श्रीविश्वनाथसूरिसूनुनारायणपण्डिताचार्यकृता
पिष्टपशुमीमांसा

श्रीमत्सत्यविजयतीर्थविनेयतिम्मणाचार्यकृता
लघुपुरोडाशमीमांसा

श्रीसत्यबोधतीर्थनिजशिष्यश्रीनिवासाचार्यकृता
पिष्टपशुमीमांसा

विश्वनाथश्रौतिकृतः यज्ञेषु पश्वालम्भनिषेधश्च ॥

संशोधकः
डा. ए.वि. नागसम्पिगे

प्रकाशनम्
श्रीविश्वेशतीर्थसंशोधनकेन्द्रम्, बेङ्गलूरु
कर्नाटकसंस्कृतविश्वविद्यालयेन
'संशोधनकेन्द्रम्' इति मानितम्
२०२३

।। श्रीविश्वनाथसूरिसूनुनारायणपण्डिताचार्यकृता
पिष्टपशुमीमांसा ।।

।। श्रीमत्सत्यविजयतीर्थविनेययतिमण्णाचार्यकृता
लघुपुरोडाशमीमांसा ।।

।। श्रीसत्यबोधतीर्थनिजशिष्यश्रीनिवासाचार्यकृता
पिष्टपशुमीमांसा ।।

।। विश्वनाथश्रौतिकृतः यज्ञेषु पश्वालम्भननिषेधः ।।

संशोधकः
डा. ए.वि. नागसम्पिगे

प्रकाशनम्
श्रीविश्वेशतीर्थसंशोधनकेन्द्रम्, बेङ्गलूरु
कर्नाटकसंस्कृतविश्वविद्यालयेन
'संशोधनकेन्द्रम्' इति मानितम्
२०२३

अधोक्षजग्रन्थमाला- १०

१. श्रीविश्वनाथसूरिसूनुनारायणपण्डिताचार्यकृता पिष्टपशुमीमांसा

२. श्रीमत्सत्यविजयतीर्थविनेयतिमण्णाचार्यकृता लघुपुरोडाशमीमांसा

३. श्रीसत्यबोधतीर्थनिजशिष्य श्रीनिवासाचार्यकृता पिष्टपशुमीमांसा

४. विश्वनाथश्रौतिकृतः यज्ञेषु पश्वालम्भननिषेधः

संशोधकः

डा. ए.वि. नागसम्पिगे

ISBN: 978-93-81275-669-6

प्रकाशनम्

श्रीविश्वेशतीर्थसंशोधनकेन्द्रम्, बेङ्गलूरु

कर्नाटकसंस्कृतविश्वविद्यालयेन

'संशोधनकेन्द्रम्' इति मानितम्

पुस्तकानि- ३००

पृष्ठानि- ७६(२५+५१)

मुद्रणम्- २०२३

मूल्यम्- ६०

अक्षरविन्यासः- प्रसाद.पि. जहागिरदार्

मुद्रणालयः- वागर्थप्रिन्टर्स्, बेङ्गलूरु

ಅನುಗ್ರಹ ಸಂದೇಶ

ಪ್ರಾಚೀನಕಾಲದಲ್ಲಿ ಯಜ್ಞಗಳಲ್ಲಿ ಆಡು, ಕುದುರೆ ಮೊದಲಾದ ಪಶುಗಳನ್ನು ವಿಶಸನ ಮಾಡಿ ಅಗ್ನಿಯಲ್ಲಿ ಹೋಮಿಸಿ, ಯಜ್ಞಗಳನ್ನು ಪೂರೈಸುವ ಸಂಪ್ರದಾಯವಿದ್ದಿತು. ಇಲ್ಲಿ ನಡೆಯುವ ಪ್ರಾಣಹಿಂಸೆಯನ್ನು ಶಾಸ್ತ್ರೋಕ್ತವಾದಕಾರಣ ಮಾನ್ಯ ಮಾಡುವ ವ್ಯವಸ್ಥೆ ಇದ್ದಿತು.

ಪ್ರಕೃತ ಇದರ ಹಿನ್ನೆಲೆಯನ್ನು ವಿಮರ್ಶಿಸುವ ನಾಲ್ಕು ಕೃತಿಗಳು ಜಿಜ್ಞಾಸುಗಳ ಮುಂದಿವೆ.

1. ಶ್ರೀವಿಶ್ವನಾಥಸೂರಿಸೂನುನಾರಾಯಣಪಂಡಿತಾಚಾರ್ಯ ಕೃತಾ ಪಿಷ್ಟಪಶುಮೀಮಾಂಸಾ.

2. ಶ್ರೀಮತ್ಸತ್ಯವಿಜಯತೀರ್ಥವಿನೇಯ ವರಖೇಡಿ ತಿಮ್ಮಣ್ಣಾಚಾರ್ಯ ಕೃತಾ ಲಘುಪುರೋಡಾಶಮೀಮಾಂಸಾ.

3. ಶ್ರೀಸತ್ಯಬೋಧತೀರ್ಥನಿಜಶಿಷ್ಯ ಶ್ರೀ ಶ್ರೀನಿವಾಸ ಆಚಾರ್ಯ ಕೃತಾ ಪಿಷ್ಟಪಶುಮೀಮಾಂಸಾ.

4. ವಿಶ್ವನಾಥಶ್ರೌತಿಕೃತಃ ಯಜ್ಞೇಷು ಪಶ್ವಾಲಂಭನನಿಷೇಧಃ

ಮೇಲಿನ ಕೃತಿಕಾರರ ಆಶಯವನ್ನು ಹೀಗೆ ನಿರೂಪಿಸ ಬಹುದಾಗಿದೆ-

ಮಹಾಭಾರತಶಾಂತಿಪರ್ವವು ಯಜ್ಞದಲ್ಲಿ 'ಅಜ'ವನ್ನು ಬಳಸಬೇಕೆಂಬ ಮಾತಿಗೆ, ಬೀಜಗಳಿಂದ ಯಜ್ಞವನ್ನು ನಡೆಸ ಬೇಕೆಂದು ವ್ಯಾಖ್ಯಾನ ಮಾಡಿದೆ-

'ಬೀಜೈರ್ಯಜ್ಞೇಷು ಯಷ್ಟವ್ಯಮ್ ಇತಿ ವೈ ವೈದಿಕೀ ಶ್ರುತಿಃ।
ಅಜಸಂಜ್ಞಾನಿ ಬೀಜಾನಿ ಛಾಗಂ ನೋ ಹಂತುಮರ್ಹಥ ॥'

ಇನ್ನೂ ಅನೇಕ ಮಹಾಭಾರತ, ಪಾದ್ಮಪುರಾಣ ಮೊದಲಾದ

ವಾಕ್ಯಗಳನ್ನು ಪರ್ಯಾಲೋಚನೆ ಮಾಡಿದಾಗ ಅಹಿಂಸಾಪರವಾದ ಯಜ್ಞವು ಶ್ರೇಷ್ಠವೆಂದೂ, ಶುದ್ಧಿಯ ಕೊರತೆಯಿರುವ ಈ ಕಲಿಯುಗದಲ್ಲಿ ಪಿಷ್ಟಪಶುವಿನಿಂದ ಯಜ್ಞವನ್ನು ನಡೆಸುವುದೇ ಶ್ರೇಯಸ್ಕರವೆಂದು ತಿಳಿಯುವುದು.

ಮೇಲೆ ತಿಳಿಸಿದ ನಾಲ್ಕು ಕೃತಿಗಳ ಶೋಧನಕಾರ್ಯವನ್ನು ನಡೆಸಿದ ನಮ್ಮ ವಿದ್ಯಾಪೀಠದ ಹಿರಿಯ ವಿದ್ವಾಂಸರಾದ ಡಾ. ಎ.ವಿ. ನಾಗಸಂಪಿಗೆ ಆಚಾರ್ಯರನ್ನು ನಾವು ಹೃದಯ ಪೂರ್ವಕವಾಗಿ ಆಶೀರ್ವದಿಸುತ್ತೇವೆ. ಅವರಿಂದ ಇಂತಹ ಕಾರ್ಯಗಳು ನಿರಂತರ ಭಗವಂತ ಸ್ವೀಕರಿಸಲೆಂದು ಪ್ರಾರ್ಥಿಸುತ್ತೇವೆ.

ಈ ಗ್ರಂಥದ ಪ್ರಕಾಶನಕ್ಕೆ ಅಗತ್ಯವಿರುವ ಆರ್ಥಿಕನೆರವನ್ನು ನೀಡಿದ ಘನತೆವೆತ್ತ ಕರ್ನಾಟಕ ಸರಕಾರದ ಮಂತ್ರಿಮಂಡಲ ಹಾಗೂ ಅಧಿಕಾರಿವರ್ಗವನ್ನು ನಾವು ಹೃದಯಪೂರ್ವಕವಾಗಿ ಅಭಿನಂದಿಸಿ ಆಶೀರ್ವದಿಸುತ್ತೇವೆ.

ವಿದ್ಯೆ ಹಾಗೂ ಸಂಸ್ಕೃತಿಗಳು ರಾಜಾಶ್ರಯವನ್ನು ಕಳೆದು ಕೊಂಡ ಸನ್ನಿವೇಶದಲ್ಲಿ ಅದನ್ನು ಹೆಮ್ಮರವಾಗಿ ಬೆಳೆಸುವ ಹೊಣೆಗಾರಿಕೆ ಹೊತ್ತ ಸರಕಾರವು ಇಂತಹ ಕಾರ್ಯಗಳಿಗೆ ಹೆಚ್ಚಿನ ಪ್ರೋತ್ಸಾಹವನ್ನು ನೀಡುತ್ತಿರುವುದು ಅಭಿನಂದನಾರ್ಹ ಸಂಗತಿಯಾಗಿದೆ. ಇಂತಹ ಪ್ರೋತ್ಸಾಹ ನಿರಂತರ ಮುಂದು ವರೆಯಲಿ ಎಂದು ಆಶಿಸುತ್ತೇವೆ.

ಶ್ರೀಶ್ರೀ ವಿಶ್ವಪ್ರಸನ್ನತೀರ್ಥ ಶ್ರೀಪಾದರು
ಶ್ರೀಪೇಜಾವರ ಅಧೋಕ್ಷಜ ಮಠ, ಉಡುಪಿ
ಅಧ್ಯಕ್ಷರು, ಶ್ರೀವಿಶ್ವೇಶತೀರ್ಥ ಸಂಶೋಧನ ಕೇಂದ್ರ

ಉಪೋದ್ಘಾತ

ಪ್ರಾಚೀನಕಾಲದಲ್ಲಿ ನಮ್ಮ ಭಾರತದೇಶದಲ್ಲಿ ಪಶುಗಳನ್ನು (ಆಡು, ಕುದುರೆ ಇತ್ಯಾದಿ) ವಿಶಸನಮಾಡಿ ಯಜ್ಞವನ್ನು ಮಾಡುವ ಕ್ರಮವಿದ್ದಿತು.

ಯಾವ ವೇದ-ಆರಣ್ಯಕ-ಇತಿಹಾಸ-ಪುರಾಣಗಳಲ್ಲಿ ಪಶು ವಿಶಸನದ ಮೂಲಕ ಯಜ್ಞವನ್ನು ನಿರೂಪಿಸಲಾಗಿದೆಯೋ ಅಲ್ಲಿಯೇ ಅಹಿಂಸಾತ್ಮಕವಾದ ಯಜ್ಞಕ್ಕೆ ಒತ್ತು ಕೊಟ್ಟಿರುವುದನ್ನು ಗಮನಿಸದಿರುವುದು ಅಚ್ಚರಿಯ ಸಂಗತಿ. ಪ್ರಕೃತ ಸಂಶೋಧಿಸಿ ಪ್ರಕಾಶಿಸಲ್ಪಡುವ ನಾಲ್ಕು ಕೃತಿಗಳು ಈ ಬಗ್ಗೆ ಹೊಸಬೆಳಕನ್ನು ಚೆಲ್ಲುತ್ತವೆ.

ಬ್ರಹ್ಮಸೂತ್ರಗಳನ್ನು ರಚಿಸಿದ ಶ್ರೀವೇದವ್ಯಾಸರು ''**ಅಶುದ್ಧಮಿತಿ ಚೇನ್ನ ಶಬ್ದಾತ್**'' (3.1.26) ಎಂಬ ಸೂತ್ರ ದಲ್ಲಿ ವೈದಿಕಯಜ್ಞದಲ್ಲಿ ನಡೆಸುವ ಪಶುವಿಶಸನವನ್ನು ಅಂಗೀಕರಿಸಿದ್ದಾರೆ. ಶ್ರೀಮಧ್ವಭಗವತ್ಪಾದರು ಹೀಗೆ ತಮ್ಮ ನಿರ್ಣಯವನ್ನು ಇಲ್ಲಿ ನೀಡಿದ್ದಾರೆ- ಯಜ್ಞದಲ್ಲಿ ಹಿಂಸೆಯು ನಡೆಯುವುದರಿಂದ ಪಾಪ ಸಂಭವಿಸುವುದು. ಅದರಿಂದ ದುಃಖವು ಅನಿವಾರ್ಯ. ಆದ್ದರಿಂದ ದುಃಖಕ್ಕೆ ಕಾರಣವಾದ ಹಿಂಸೆಯನ್ನು ತೊರೆಯಬಹುದಲ್ಲವೇ ?

ಯಜ್ಞದಲ್ಲಿ ಅರ್ಪಿಸಲ್ಪಡುವ ಪಶುಗಳು ಉತ್ತಮವಾದ ಲೋಕಗಳನ್ನು ಪಡೆಯುವುದಲ್ಲದೇ ಮುಂದೆ ಒಳ್ಳೆಯ ಜನ್ಮವನ್ನು ಪಡೆಯುವ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ವೇದ-ಶಾಸ್ತ್ರಗಳು ಅದನ್ನು ಅಂಗೀಕರಿಸಿವೆ. ವೇದೋಕ್ತವಾದ ಹಿಂಸೆಯನ್ನು ನಾವು ಹಿಂಸೆ ಎಂದು ಪರಿಗಣಿಸುವಂತಿಲ್ಲ. ಮಾನವನು ತನ್ನ ಆಹಾರಕ್ಕಾಗಿ ನಿಷ್ಕಾರಣವಾಗಿ ಪಶುಗಳನ್ನು ಕೊಲ್ಲುವುದು ನಿಶ್ಚಿತವಾಗಿಯೂ ಹಿಂಸೆ ಎನಿಸಿದೆ. ವೇದದಲ್ಲಿ ವರ್ಣಿಸಿದ

ಯಜ್ಞಾಂಗವಾದ ಹಿಂಸೆಯು ಮಾತ್ರ ಹಿಂಸೆ ಎನಿಸುವುದಿಲ್ಲ.

'ಹಿಂಸಾ ತ್ವವೈದಿಕೀ ಯಾ ತು ತಯಾನರ್ಥೋ ಧ್ರುವಂ ಭವೇತ್ ।
ವೇದೋಕ್ತಯಾ ಹಿಂಸಯಾ ತು ನೈವಾನರ್ಥಃ ಕಥಂಚನ ॥'

ಈ ಬ್ರಹ್ಮಸೂತ್ರದ ವ್ಯಾಖ್ಯಾನದ ಪ್ರಸಂಗದಲ್ಲಿ ಶ್ರೀಶಂಕರಾಚಾರ್ಯರು ಹಾಗೂ ಶ್ರೀರಾಮಾನುಜಾಚಾರ್ಯರೂ ಕೂಡ ಯಜ್ಞದಲ್ಲಿ ನಡೆಸುವ ಪಶುವಿಶಸನೆಯು ಅಧರ್ಮವಲ್ಲವೆಂದು, ಇತರಪ್ರಸಂಗಗಳಲ್ಲಿ ಅನಗತ್ಯವಾಗಿ ಪಶುಗಳನ್ನು ಕೊಲ್ಲುವುದು ಹಿಂಸೆಯಾಗಿದ್ದು ಪಾಪಸಾಧನವೆಂದು ನಿರ್ಣಯಿಸಿದ್ದಾರೆ.

ಶ್ರೀಮಧ್ವಭಗವತ್ಪಾದರು ಭಾಗವತತಾತ್ಪರ್ಯನಿರ್ಣಯದಲ್ಲಿ ''**ಲೋಕೇ ವ್ಯವಾಯಾಮಿಷಮದ್ಯಸೇವಾ**'' (11.5.11) ಶ್ಲೋಕದ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಪುರಾಣಗಳ ಆಂತರ್ಯವನ್ನು ಹೀಗೆ ಬಣ್ಣಿಸಿದ್ದಾರೆ–

ಸ್ತ್ರೀಸಂಗ–ಮಾಂಸಸೇವನೆ–ಮದ್ಯಸೇವನೆಗಳು ಮಾನವರ ಸಹಜಪ್ರವೃತ್ತಿಗಳು. ಆದರೆ ಇದನ್ನು ಒಳ್ಳೆಯ ಉದ್ದೇಶದಿಂದ ಮಾಡುವುದು ಕೆಲವರಿಗೆ ದೋಷವಾಗುವುದಿಲ್ಲ. ವಿವಾಹ ಸಂಸ್ಕಾರವನ್ನು ಪಡೆದ ಪತಿ–ಪತ್ನಿಯು ಒಳ್ಳೆಯ ಸಂತಾನಕ್ಕಾಗಿ ಇದೊಂದು ವಾಮದೇವಯಜ್ಞ ಎಂಬ ಅನುಸಂಧಾನದೊಂದಿಗೆ ಬೆರೆಯುವುದು ಯುಕ್ತವೇ ಆಗಿದೆ. ಅದಲ್ಲದೇ ಶ್ರಾದ್ಧಗಳಲ್ಲಿ ಮಾಂಸವನ್ನು ಬಳಸುವುದು ತಪ್ಪಲ್ಲ. ಪತ್ನಿಯ ಸಂಗಕಾಲದಲ್ಲಿ ಮದ್ಯವನ್ನು ಸ್ವೀಕರಿಸುವುದು ಯಜ್ಞದಲ್ಲಿ ಸೋಮರಸವನ್ನು ಸ್ವೀಕರಿಸಿದಂತೆ. ಇದು ತಪ್ಪಲ್ಲ. ಆದರೆ ಮದ್ಯಸ್ವೀಕಾರ ಮಾಡುವ ಅವಕಾಶವು ಕೇವಲ ಕ್ಷತ್ರಿಯರಿಗೆ ಅನ್ವಯವಾಗುತ್ತದೆ. ಯಾವುದೇ ಪ್ರಸಂಗದಲ್ಲಿಯೂ ಬ್ರಾಹ್ಮಣನು ಮದ್ಯಪಾನ ಮಾಡುವಂತಿಲ್ಲ. ಬ್ರಾಹ್ಮಣನು ಮದ್ಯಪಾನವನ್ನು ಮಾಡಿದರೆ ಪತಿತನೆನಿಸಿ

ತ್ಯಾಜ್ಯನಾಗುತ್ತಾನೆ. ಈ ದೃಷ್ಟಿಯಿಂದ ಯಜ್ಞಭಾವನೆಯಿಂದ ಮಾಂಸ–ಮದ್ಯಗಳ ಅಂಗೀಕಾರವು ಇದ್ದಿತು. ಆದರೆ ಯಾವುದೇ ಯುಗದಲ್ಲಿ ಬ್ರಾಹ್ಮಣರು ಮದ್ಯಪಾನ ಮಾಡುವ ಅವಕಾಶವು ಇರಲಿಲ್ಲ.

'ವ್ಯವಾಯಾಮಿಷಮದ್ಯಾನಿ ಹರೇಃ ಪೂಜಾರ್ಥಮೇವ ತು ।
ವಾಮದೇವ್ಯೋ ನಾಮ ಯಜ್ಞೋ ವ್ಯವಾಯೋ ಹರಿಪೂಜನಮ್ ॥

ಪಿತೃಯಜ್ಞೋ ದೇವಯಜ್ಞೋ ಮಾಂಸೇನ ಹರಿಪೂಜನಮ್ ।
ವ್ಯವಾಯಯಜ್ಞೇ ಮದ್ಯಂ ತು ಸೋಮಾತ್ಮಕತಯೇಷ್ಯತೇ ।

ಕ್ಷತ್ರಿಯಾದೇರ್ನ ವಿಪ್ರಾಣಾಂ ವಿಪ್ರೋ ದೋಷೇಣ ಲಿಪ್ಯತೇ ।'

ಮಾಂಸಭಕ್ಷಣವು ಬ್ರಾಹ್ಮಣರಿಗೆ ಹಿಂದಿನ ಯುಗಗಳಲ್ಲಿ ಶ್ರಾದ್ಧಕಾಲದಲ್ಲಿ ಅನುಮತವಾಗಿದ್ದಿತು. ಅನಗತ್ಯಹಿಂಸೆಯು ನಿಷೇಧಿಸಲ್ಪಟ್ಟಿದೆ.

ಪ್ರಕೃತ ಕಲಿಯುಗದಲ್ಲಿ ಬ್ರಾಹ್ಮಣರು ಯಾವುದೇ ಕಾರಣಕ್ಕಾಗಿಯೂ ಮಾಂಸಭಕ್ಷಣವನ್ನು ಮಾಡುವಂತಿಲ್ಲ. ಇದರಿಂದ ಅಂತಿಮವಾಗಿ ತಿಳಿದುಬರುವುದೇನೆಂದರೆ ಕಲಿಯುಗದಲ್ಲಿ ಯಜ್ಞ–ಯಾಗವನ್ನು ನಿಮಿತ್ತವನ್ನಾಗಿ ಮಾಡಿಕೊಂಡು ಅಥವಾ ಆತಿಥ್ಯಕ್ಕಾಗಿ ಪಶುಗಳನ್ನು ಕೊಲ್ಲುವಂತಿಲ್ಲ. ಇಂದಿನ ಕಾಲದಲ್ಲಿ ಯಜ್ಞದಲ್ಲಿ ಮಾಡುವ ಪಶುಹಿಂಸೆಯು ಪಾಪಸಾಧನವಾಗಿದೆ.

ವೇದೋಕ್ತವಾದ ಆದೇಶಗಳು ಕಾಲಬಾಧಿತವಾಗುವುದಿಲ್ಲ. ಕೆಲವು ಕಾಲದಲ್ಲಿ ಕೆಲವು ಧರ್ಮಗಳು ಅನುಷ್ಠಾನಕ್ಕೆ ನಿಲುಕದ ಸನ್ನಿವೇಶ ಒದಗಿದಾಗ 'ಪ್ರತಿನಿಧಿ' ವ್ಯವಸ್ಥೆ ಕಂಡುಬರುವುದು. ಯುಗಭೇದದಿಂದ ಕೆಲವು ಆದೇಶಗಳು ಪರಿಷ್ಕರಿಸಲ್ಪಡುತ್ತವೆ

ಇಂದು ಪ್ರಾಚೀನಕಾಲದ ತಪಸ್ಸಿದ್ಧಿ ಇರುವ ಯಾಜಕರಾಗಲೀ ಕುಲಶುದ್ಧಿ ಇರುವ ಯಜಮಾನರಾಗಲೀ ದೊರಕದಿರುವ

ಕಾರಣ ಪಶುಹಿಂಸಾತ್ಮಕವಾದ ಯಜ್ಞವನ್ನು ನಡೆಸದಿರುವುದು ಯೋಗ್ಯವಾಗಿದೆ. ಪ್ರಾಚೀನಕಾಲದ ವಸಿಷ್ಠ-ವಾಮದೇವಾದಿ ಸದೃಶರಾದ ಋಷಿಗಳು ದೊರಕುವಲ್ಲಿ ಇಂದಿಗೂ ಅಂತಹ ಯಜ್ಞಗಳು ಪ್ರಸ್ತುತವಾಗಿವೆ. ಆದರೆ ಅಂತಹ ಯಾಜಕರು ಹಾಗೂ ಯಜಮಾನರಿಲ್ಲದ ಇಂದಿನ ಕಲಿಯುಗದಲ್ಲಿ ಹಿಟ್ಟಿನಿಂದ ಮಾಡಿದ ಪಶುಗಳಲ್ಲಿ ಯಾಜ್ಞೀಯಪಶುವನ್ನು ಆವಾಹನೆ ಮಾಡಿ ಅದರ ದೇಹಭಾಗಗಳನ್ನು ಯಜ್ಞದಲ್ಲಿ ಹೋಮಿಸುವುದು ಯುಕ್ತವಾಗುವುದು. ಈ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ಯಾಗಗಳನ್ನು ನಡೆಸಿದ ಪುಣ್ಯವೂ ದೊರಕುವುದು, ಅಹಿಂಸೆಯ ಮೂಲತತ್ವವನ್ನು ಕಾಪಾಡಿಕೊಂಡಂತೆಯೂ ಆಗುವುದು.

ವಿಶ್ವನಾಥಸೂರಿಗಳ ಆಶಯ-

ವಿಶ್ವನಾಥಸೂರಿಗಳು ಶ್ರೀಮದುತ್ತರಾದಿಮಠಾಧೀಶರಾದ ಶ್ರೀರಘೂತ್ತಮತೀರ್ಥರ (1557-1595) ಶಿಷ್ಯರು. ಇವರ ಇಬ್ಬರು ಮಕ್ಕಳಲ್ಲಿ ಒಬ್ಬರಾದ ಈ ನಾರಾಯಣಾಚಾರ್ಯರು ವೈಶ್ವನಾಥಿ ನಾರಾಯಣಾಚಾರ್ಯರೆಂದೇ ಪ್ರಸಿದ್ಧರಾಗಿದ್ದಾರೆ. ಇವರ ಸಹೋದರ ಶ್ರೀರಾಮಾಚಾರ್ಯರು ನ್ಯಾಯಾಮೃತಕ್ಕೆ ತರಂಗಿಣೀಯನ್ನು ರಚಿಸಿ ಅದ್ವೈತಸಿದ್ಧಿಯ ಆಕ್ಷೇಪಗಳಿಗೆ ನ್ಯಾಯಾಮೃತದ ಮೂಲಕ ಉತ್ತರ ನೀಡಿದ ಮಹಾನುಭಾವರು. ವಿಶ್ವನಾಥಸೂರಿಗಳ ಮಕ್ಕಳಾದ ಶ್ರೀನಾರಾಯಣಪಂಡಿತರ ಕೃತಿಯ ಒಂದೆರಡು ಅಂಶಗಳನ್ನು ವಾಚಕರ ಅವಗಾಹನೆಗೆ ತರುತ್ತಿದ್ದೇನೆ.

ಸಂಸಾರವೆಂಬ ಕಾಡಿನಲ್ಲಿ ಸಂಕಟದಲ್ಲಿ ಮುಳುಗಿದ ಸಾತ್ವಿಕಜೀವನಿಗೆ ಹೆಣ್ಣು-ಹೊನ್ನು-ಮಣ್ಣುಗಳಿಂದ ದೊರಕುವ ಸುಖವು ಚಂಚಲವಾಗಿದ್ದು ಶಾಶ್ವತವಾದ ಆನಂದವನ್ನು ನೀಡುವುದಿಲ್ಲ. ಶಾಶ್ವತವಾದ ಆನಂದವು ಕೇವಲ ಜ್ಞಾನದಿಂದಮಾತ್ರವೇ ಲಭ್ಯವಾಗಿದೆ. ನಿರ್ಮಲವಾದ

ಪರಮಾತ್ಮನ ತತ್ವಜ್ಞಾನವು ಮುಕ್ತಿಸಾಧನವೆನಿಸಿದೆ. ಈ ಜ್ಞಾನವು ನಮ್ಮ ಹೃದಯದಲ್ಲಿ ಪ್ರಕಟಗೊಳ್ಳಲು ವೇದೋಕ್ತವಾದ ಸತ್ಕರ್ಮಗಳ ಅನುಷ್ಠಾನವು ಅನಿವಾರ್ಯವಿದೆ. ಇದರಂತೆ ನಿಷಿದ್ಧವಾದ ಆಹಾರ-ವಿಹಾರತ್ಯಾಗವೂ ಅನಿವಾರ್ಯವಾಗಿದೆ.

ವೇದೋಕ್ತವಾದ ಕರ್ಮಗಳನ್ನು ಎರಡು ಬಗೆಯಾಗಿ ವಿಂಗಡಿಸಬಹುದಾಗಿದೆ. ಅಗ್ನಿಹೋತ್ರ-ದರ್ಶಪೂರ್ಣಮಾಸ ಮೊದಲಾದವುಗಳು 'ನಿತ್ಯ'ವೆನಿಸಿವೆ. ಜ್ಯೋತಿಷ್ಟೋಮಾದಿ ಯಾಗಗಳು, ಪುತ್ರೇಷ್ಟಿ ಮೊದಲಾದವುಗಳು 'ನೈಮಿತ್ತಿಕ'ವೆನಿಸಿವೆ. ಈ ಕರ್ಮಗಳ ಅನುಷ್ಠಾನದಿಂದ ಮನಸ್ಸಿನ ಕೊಳೆಯನ್ನು ಕಳೆದುಕೊಂಡಾಗ ಜ್ಞಾನವು ನಮ್ಮಲ್ಲಿ ಸ್ಥಿರವಾಗಿ ನಿಂತು ಮುಕ್ತಿಗೆ ಕಾರಣವಾಗಬಲ್ಲದು.

ಇಂದಿನ ಕಲಿಯುಗದಲ್ಲಿ ನಿರಂತರ ಅನುಷ್ಠಾನಶೀಲನಾದ ತಪಸ್ವಿಯಾದ ವ್ಯಕ್ತಿಯು ಯಜ್ಞ-ಯಾಗಗಳ ಮೂಲಕ ಮನಸ್ಸಿನ ಕೊಳೆಯನ್ನು ಕಳೆದುಕೊಳ್ಳಬಹುದು, ಆದರೆ ಅಂತಹ ಮನಶ್ಶುದ್ಧಿಯಿಲ್ಲದ ವೈದಿಕರು ನಡೆಸುವ ಯಜ್ಞಾನುಷ್ಠಾನಗಳಿಂದ ಪಾಪವೇ ಬರುವ ಸಂಭವವಿದೆ.

ಮಾನವನು ಆಹಾರಕ್ಕಾಗಿ ಯಾವುದೇ ಪಶು-ಪಕ್ಷಿಗಳನ್ನು ಕೊಂದರೆ ಆ ಪಶುಗಳ ದೇಹದಲ್ಲಿರುವ ರೋಮಗಳಷ್ಟು ಕಾಲ ತಾನೂ ಕೂಡ ಪಶುವಾಗಿ ಹುಟ್ಟಿ ಇತರರಿಂದ ಕೊಲ್ಲಲ್ಪಡುತ್ತಾನೆ. ಉತ್ತಮವಾದ ಜನ್ಮವನ್ನು ಪಡೆಯುವುದಿಲ್ಲ.

'ಯಾವಂತಿ ಪಶುರೋಮಾಣಿ ತಾವತ್ಕೃತ್ವೋ ಹಿ ಮಾರಣಮ್ ।
ವೃಥಾ ಪಶುಘ್ನಃ ಪ್ರಾಪ್ನೋತಿ ಪ್ರೇತ್ಯ ಜನ್ಮನಿ ಜನ್ಮನಿ ॥'

ಪ್ರಕೃತ ಕಲಿಯುಗದಲ್ಲಿ ಯಜ್ಞ ನಡೆಸುವ ಪುರೋಹಿತರಲ್ಲಿ ಇಂದ್ರಿಯನಿಗ್ರಹ, ಮನಶ್ಶುದ್ಧಿ, ಆಹಾರಶುದ್ಧಿ, ತಪಸ್ಸುಗಳು ಇಲ್ಲದಕಾರಣ ಪಶುವಿಶಸನದ ಮೂಲಕ ಮಾಡಬಹುದಾದ

ಯಜ್ಞವನ್ನು ಪ್ರತಿನಿಧಿಯಾದ ಹಿಟ್ಟಿನ ಪಶುವಿನ ವಿನಿಯೋಗದಿಂದಲೂ ಮಾಡಬಹುದಾಗಿದೆ.

ಆದರೆ ಈ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ಬಂದ ಸ್ಮೃತಿಕಾರರ ಈ ವಚನವನ್ನು ನಾವು ಗಮನಿಸಬಹುದಾಗಿದೆ-

ಕುರ್ಯಾತ್ ಘೃತಪಶುಂ ಸಂಗೇ ಕುರ್ಯಾತ್ ಪಿಷ್ಟಪಶುಂ ತಥಾ ।
ನತ್ವೇವ ತು ವೃಥಾ ಹಂತುಂ ಪಶುಮಿಚ್ಛೇತ್ ಕದಾಚನ ॥

(ಮ.ಸ್ಮೃ - 5.37)

ಯಜ್ಞಗಳಲ್ಲಿ ತುಪ್ಪದಿಂದ ನಿರ್ಮಿಸಿದ ಅಥವಾ ಹಿಟ್ಟಿನಿಂದ ನಿರ್ಮಿಸಿದ ಪಶುಗಳ ದೇಹಭಾಗವನ್ನು ಅಗ್ನಿಯಲ್ಲಿ ಅರ್ಪಿಸುವುದರ ಮೂಲಕ ಯಜ್ಞವನ್ನು ಪೂರೈಸಬಹುದಾಗಿದೆ. ಅನಗತ್ಯವಾಗಿ ಪಶುಹಿಂಸೆಯನ್ನು ಮಾಡಬಾರದು.

ಶ್ರೀವರಖೇಡಿ ತಿಮ್ಮಣ್ಣಾಚಾರ್ಯರ ಆಶಯ-

ಶ್ರೀಮದುತ್ತರಾದಿಮಠದ ಶ್ರೀಸತ್ಯವಿಜಯತೀರ್ಥರ (1726-1737) ಶಿಷ್ಯರಾದ ಶ್ರೀವರಖೇಡಿ ತಿಮ್ಮಣ್ಣಾಚಾರ್ಯರ ಕೃತಿಯ ಮುಖ್ಯಾಂಶಗಳನ್ನು ಹೀಗೆ ಸಂಗ್ರಹಿಸಬಹುದಾಗಿದೆ-

ಋಗ್ವೇದಬ್ರಾಹ್ಮಣದ ಎರಡನೆಯ ಪಂಚಿಕೆಯಲ್ಲಿ ಮುಖ್ಯವಾದ ಹೋಮ್ಯಪದಾರ್ಥವನ್ನು ಬಳಸಲಾಗದಿರುವಲ್ಲಿ ಪ್ರತಿನಿಧಿಯನ್ನು ಬಳಸುವುದು ಅಂಗೀಕೃತವಾಗಿದೆ. ಒಂದು ಕಾಲದಲ್ಲಿ ಮಾನವನನ್ನು ಯಜ್ಞದಲ್ಲಿ ವಿಶಸನಕ್ಕಾಗಿ ಸ್ವೀಕರಿಸಲಾಯಿತು. ಅನಂತರ ಮನುಷ್ಯನು ಯಜ್ಞಕ್ಕೆ ಉಪಯುಕ್ತನಲ್ಲವೆಂದು ಅವನನ್ನು ತೊರೆಯಲಾಯಿತು. ಅನಂತರ ಕುದುರೆ ಆಡು ಮೊದಲಾದ ಪ್ರಾಣಿಗಳನ್ನು ಸ್ವೀಕರಿಸಲಾಯಿತು. ಅಂತಿಮವಾಗಿ ಪಶುವಿನ ಸ್ಥಾನದಲ್ಲಿ ಹಿಟ್ಟಿನಿಂದ ಪಶುವನ್ನು ಸಿದ್ಧಪಡಿಸಿ ಅದರ ದೇಹಭಾಗವನ್ನು

ಅಗ್ನಿಯಲ್ಲಿ ಹೋಮಿಸುವ ಪದ್ಧತಿಯು ಅಂಗೀಕೃತವಾಗಿದೆ. ಕೃಷ್ಣಯಜುರ್ವೇದವು (6.3.10) ಈ ಅಂಶವನ್ನು ಪ್ರತಿಪಾದಿಸುತ್ತದೆ.

ಕಲಿಯುಗದಲ್ಲಿ ಹಿಂದಿನ ಯುಗಗಳಲ್ಲಿ ಇದ್ದ ಕೆಲವು ಆಚರಣೆಗಳು ನಿಷೇಧಿಸಲ್ಪಟ್ಟಿವೆ. ಅವುಗಳನ್ನು ಹೀಗೆ ಪಟ್ಟಿ ಋಷಿಗಳು ಮಾಡಿದ್ದಾರೆ-

1. ಕುದುರೆಯ ದೇಹಭಾಗವನ್ನು ಯಜ್ಞದಲ್ಲಿ ಹೋಮಿಸುವುದು.

2. ಹಸು-ಆಡು ಮುಂತಾದ ಪ್ರಾಣಿಗಳ ದೇಹಭಾಗವನ್ನು ಯಜ್ಞದಲ್ಲಿ ಹೋಮಿಸುವುದು.

3. ದೀರ್ಘಕಾಲದ ಬ್ರಹ್ಮಚರ್ಯ. (ಆಜನ್ಮ ಬ್ರಹ್ಮಚಾರಿಯಾಗಿರುವುದು.

4. ಮಾಂಸದಿಂದ ಶ್ರಾದ್ಧ ಮಾಡುವುದು.

5. ಗಂಡನಿಲ್ಲದಿರುವಾಗ ಮೈದುನನಿಂದ ಸಂತಾನವನ್ನು ಪಡೆಯುವುದು.

'ಅಶ್ವಾಲಂಭಂ ಗವಾಲಂಭಂ ಸನ್ನ್ಯಾಸಂ ಪಲಪೈತೃಕಮ್ ।
ದೇವರೇಣ ಸುತೋತ್ಪತ್ತಿಂ ಕಲೌ ಪಂಚ ವಿವರ್ಜಯೇತ್ ॥'

ಈ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ತ್ರೇತಾಯುಗದಲ್ಲಿ ಪ್ರತ್ಯಕ್ಷಪಶುವಿನಿಂದ ಯಜ್ಞನಿರ್ವಹಣೆ. ಕಲಿಯುಗದಲ್ಲಿ ಹಿಟ್ಟಿನಿಂದ ನಿರ್ಮಿಸಿದ ಪಶ್ವಾಕೃತಿಯಿಂದ ಯಜ್ಞನಿರ್ವಾಹವು ಶಾಸ್ತ್ರಸಮ್ಮತ-

''ತತಸ್ತ್ರೇತಾಯುಗಂ ನಾಮ ತ್ರಯೀ ಯತ್ರ ಪ್ರವರ್ತತೇ ।
ಮೋಕ್ಷಿತಾ ಯಜ್ಞಪಶವೋ ಬಂಧಂ ಪ್ರಪ್ಸ್ಯಂತಿ ವೈ ಮಖೇ'' ॥

ಕೆಲವರು ಪಶುಸ್ಥಾನದಲ್ಲಿ ಪುರೋಡಾಶವನ್ನು ಬಳಸುವುದು ಅರ್ಥವಾದವೆಂದು ವಾದಿಸುತ್ತಾರೆ. ಇದು ಯುಕ್ತವಲ್ಲ.

ಏಕೆಂದರೆ ಪರದಾರಾನ್ನಗಚ್ಛೇತ್' ಮಾ ಹಿಂಸ್ಯಾತ್ ಸರ್ವಾ ಭೂತಾನಿ' ಇತ್ಯಾದಿ ನಿಷೇಧವಚನಗಳೂ ಅರ್ಥವಾದವೆಂದು ಹೇಳಬೇಕಾದೀತು. ಆದ್ದರಿಂದ ಪಿಷ್ಟಪಶುವಿನಿಂದ ಹೋಮ ಮಾಡುವುದೇ ಅತ್ಯಂತ ಸಮಂಜಸವಾಗಿದೆ.

ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರ ಆಶಯ-

'ಪಿಷ್ಟಪಶುಮೀಮಾಂಸಾ' ಎಂಬ ಕೃತಿಯನ್ನು ರಚಿಸಿದ ಶ್ರೀ ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರು ವ್ಯಾಸ ಎಂಬ ಕುಲನಾಮವುಳ್ಳ ತಿರುಮಲಾಚಾರ್ಯರ ಪುತ್ರರಾಗಿದ್ದಾರೆ. ಇವರು ಸ್ವತಃ ಸೋಮಯಾಗವನ್ನು ಮಾಡಿ ಹಿಟ್ಟಿನಿಂದ ಮಾಡಿದ ಪಶುವನ್ನು ಯಜ್ಞದಲ್ಲಿ ಅರ್ಪಿಸಿ ಯಜ್ಞಗಳನ್ನು ಪೂರೈಸಿದ್ದಾರೆ. ಅವರೇ ಈ ನಿಬಂಧವನ್ನೂ ರಚಿಸಿದ್ದಾರೆ. ಇವರು ಶ್ರೀಮದುತ್ತರಾದಿ ಮಠಾಧೀಶರಾದ ಶ್ರೀಸತ್ಯಬೋಧತೀರ್ಥರ(1744-1783) ಶಿಷ್ಯರಾಗಿದ್ದಾರೆ.

ಯಜ್ಞದಲ್ಲಿ ಆಡನ್ನು ಬಳಸಿ ಹೋಮಿಸಬೇಕು ಎಂಬ ವಿಧಿ ಇದೆ. ಇಲ್ಲಿ 'ಅಜ' ಎಂದರೆ 'ಆಡು' ಎಂದು ಅರ್ಥವಲ್ಲ. 'ಧಾನ್ಯ'ವೆಂದು ಅರ್ಥವಾಗಿದೆ. ಆದ್ದರಿಂದ ಧಾನ್ಯದಿಂದ ಪಶುವಿನ ಆಕಾರವನ್ನು ಸಿದ್ಧಪಡಿಸಿ ಅದರ ಭಾಗಗಳನ್ನು ಹೋಮಕ್ಕಾಗಿ ಬಳಸಬೇಕೆಂದು ಅಭಿಪ್ರಾಯವಾಗಿದೆ. ಮಹಾಭಾರತದ ಶಾಂತಿಪರ್ವದ 345ನೇ ಅಧ್ಯಾಯವನ್ನು ಗಮನಿಸಿದಾಗ ಈ ಅಂಶವು ಸ್ಫುಟವಾಗುವುದು-

'ಬೀಜೈರ್ಯಜ್ಞೇಷು ಯಷ್ಟವ್ಯಮ್ ಇತಿ ವೈ ವೈದಿಕೀ ಶ್ರುತಿಃ ।
ಅಜಸಂಜ್ಞಾನಿ ಬೀಜಾನಿ ಛಾಗಂ ನೋ ಹಂತುಮರ್ಹಥಾ ॥''

(ಮ.ಭಾ.ಶಾಂ.345.7)

ವೇದ-ಆರಣ್ಯಕಗಳಲ್ಲಿ ಒಂದುಕಡೆ ಬದುಕಿರುವ ಪಶುಗಳನ್ನು ಯಜ್ಞದಲ್ಲಿ ವಿಶಸನ ಮಾಡಿ ಅರ್ಪಿಸಬೇಕೆಂಬ

ವಿಧಿಯು ಕಾಣುವುದು. ಮತ್ತೊಂದು ಕಡೆ ಹಿಟ್ಟಿನಿಂದ ಪಶುವಿನ ಆಕಾರವನ್ನು ನೀಡಿ ಅದರ ದೇಹಭಾಗವನ್ನು ಹೋಮಿಸಬೇಕೆಂದು ಆದೇಶವು ಕಾಣುತ್ತದೆ. ಇವುಗಳಲ್ಲಿ ಪರಸ್ಪರವಿರೋಧವು ಕಂಡು ಬರುತ್ತದೆ. ಇದನ್ನುಅಧಿಕಾರಿಭೇದದಿಂದ ಉಪಪಾದಿಸಬೇಕು.

ವಸಿಷ್ಠ-ವಾಮದೇವರಂತಹ ಜಿತೇಂದ್ರಿಯರಾದ ಪುರೋಹಿತರು ದೊರಕಿದಾಗ ಪಶುವಿಶಸನವನ್ನು ಮಾಡಿ ಯಜ್ಞವನ್ನು ಮಾಡಬಹುದಾಗಿದೆ.

ನಮ್ಮ ಕಾಲದಲ್ಲಿ ಇರುವ ಪುರೋಹಿತರಲ್ಲಿ ತಪಸ್ಸು ಸಿದ್ಧಿಗಳ ಕೊರತೆಯಿರುವ ಕಾರಣ ಹಿಟ್ಟಿನಿಂದ ಮಾಡಿದ ಪಶುಗಳ ದೇಹಭಾಗವನ್ನು ಹೋಮಿಸಿ ಯಜ್ಞವನ್ನು ನಿರ್ವಹಿಸಬಹುದಾಗಿದೆ.

ಪರಮಾತ್ಮನ ವಿಶ್ವರಕ್ಷಣೆ-ವಿಶ್ವಸಂಹಾರ ಮೊದಲಾದ ಮಹಾಗುಣಗಳನ್ನು ಬ್ರಹ್ಮ-ರುದ್ರಾದಿ ದೇವತೆಗಳು ಉಪಾಸನೆ ಮಾಡುತ್ತಾರೆ. ಇಂತಹ ಗುಣಗಳ ಉಪಾಸನೆಯು ಉತ್ತಮಾಧಿಕಾರಿಗಳಿಗೆ ಸಂಬಂಧಿಸಿದೆ ಎಂದು ಸೂತ್ರಕಾರರಾದ ಶ್ರೀವ್ಯಾಸರು 'ಸಂಭೃತಿ ದಿವ್ಯಾಪ್ತ್ಯಪಿ ಚಾತಃ'(3.3.23) ಎಂಬಲ್ಲಿ ನಿರ್ಣಯಿಸಿದ್ದಾರೆ. ಈ ಉಪಾಸನೆ ವೇದೋಕ್ತವಾದರೂ ನಮಗೆ ವಿಹಿತವಲ್ಲ. ಸಾಮಾನ್ಯಸಾಧಕರು ಪರಮಾತ್ಮನು ಆನಂದ-ಜ್ಞಾನ-ಸ್ವಾಮಿತ್ವಾದಿ ಗುಣವುಳ್ಳವನೆಂದು ಚಿಂತಿಸಬೇಕೆಂದು ನಿರೂಪಿಸಿದ್ದಾರೆ. ಹೀಗೆ ವೇದೋಕ್ತವಾದ ವಿಧಿಗಳು ಅಧಿಕಾರಿಭೇದದಿಂದ ಅನ್ವಯವಾಗುವಂತೆ ಪ್ರಕೃತದಲ್ಲಿಯೂ ಕೂಡ ಕೆಲವು ವಿಧಿಗಳನ್ನು ನಾವು ಅಧಿಕಾರಿಭೇದದಿಂದ ಉಪಪಾದಿಸಬಹುದಾಗಿದೆ.

ಶ್ರೀವಿಶ್ವನಾಥಶ್ರೌತಿಗಳ ಆಶಯ–

ಇವರು 19ನೇ ಶತಮಾನದ ಶ್ರೇಷ್ಠ ವಿದ್ವಾಂಸರು. ಮಹಾರಾಷ್ಟ್ರದ ಸೋಲಾಪುರದ ಅಕ್ಕಲಕೋಟ ಗ್ರಾಮದಲ್ಲಿದ್ದ ಗಜಾನನ ಮಹಾರಾಜರ ಪಾದಸೇವಿಗಳು. ಸೀತಾರಾಮ ಯಜ್ವಿಗಳ ಸುಪುತ್ರರು. ದಕ್ಷಿಣಾಮ್ನಾಯ ಶೃಂಗೇರಿಪೀಠದ ಅಧಿಪತಿಗಳಾಗಿದ್ದ ಶ್ರೀಅಭಿನವವಿದ್ಯಾತೀರ್ಥಸ್ವಾಮಿಗಳ ಅನುಗ್ರಹಪಾತ್ರರು. ಅವರ ಆಶಯ ಹೀಗಿದೆ–

ಕೆಲವರು ಹೀಗೆ ವಾದಿಸುತ್ತಾರೆ–

ಎಲ್ಲಿಯವರೆಗೆ ಚಾತುರ್ವರ್ಣ್ಯದ ವ್ಯವಸ್ಥೆ ಇರುವುದೋ ಎಲ್ಲಿಯ ತನಕ ವೇದವು ಇರುವುದೋ ಅಲ್ಲಿಯವರೆಗೆ ಕಲಿಯುಗದಲ್ಲಿಯೂ ಸನ್ನ್ಯಾಸ ಹಾಗೂ ಅಗ್ನಿಹೋತ್ರಗಳನ್ನು ನಡೆಸಬೇಕು.

'ಯಾವದ್ವರ್ಣವಿಭಾಗೋಽಸ್ತಿ ಯಾವದ್ವೇದೋ ಮಹೀತಲೇ।
ಅಗ್ನಿಹೋತ್ರಂ ಚ ಸನ್ನ್ಯಾಸಂ ಕಲೌ ತಾವತ್ಪ್ರವರ್ತಯೇತ್ ॥'

ಮೇಲಿನ ವಾದವು ದುರ್ವಾದವಾಗಿದೆ. ಏಕೆಂದರೆ ಇಂದು ಭಾರತದ ಸಂವಿಧಾನದ ಪ್ರಕಾರ ವರ್ಣಾಶ್ರಮಧರ್ಮದ ಅನುಷ್ಠಾನವು ನಿಷೇಧಿಸಲ್ಪಟ್ಟಿದೆ. ಕಾಲಬಲದಿಂದ ಪ್ರಾಯಃ ವರ್ಣಾಶ್ರಮಧರ್ಮಗಳು ನಷ್ಟವಾಗಿದ್ದಾವೆ. 'ಪಶ್ವಾಲಂಭಂ ಗವಾಲಂಭಮ್' ಇತ್ಯಾದಿಯಾಗಿ ಧರ್ಮಶಾಸ್ತ್ರಕಾರರಾದ ಋಷಿಗಳು ಕಲಿಯುಗದಲ್ಲಿ ಪಶುವಿಶಸನವನ್ನು ಬಹಿಷ್ಕರಿಸಿದ್ದಾರೆ. ಈ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ಪ್ರತಿನಿಧಿಯಾದ ತುಪ್ಪದಿಂದಲೋ, ಹಿಟ್ಟಿನಿಂದಲೋ ಮಾಡಿದ ಪಶುವಿನಿಂದ ಹೋಮವನ್ನು ಮಾಡಲು ಸಾಧ್ಯವಿರುವಾಗ ಪಶುಗಳ ವಿಶಸನವು ಯೋಗ್ಯವಾಗುವುದಿಲ್ಲ. 'ಸೋಮಾಭಾವೇ ಪೂತಿಕಾಗ್ರಹಣಮ್' ಎಂಬುದಾಗಿ ಸೋಮಲತೆಯು

ದೊರಕಿರುವಲ್ಲಿ ಅದರ ಪ್ರತಿನಿಧಿಯಾಗಿ ಪೂತಿಕಾಲತೆಯನ್ನು ಸ್ವೀಕರಿಸುವುದು ಯಾಜ್ಞಿಕರಿಗೆ ಸಮ್ಮತವೇ ಆಗಿದೆ. ಆದ್ದರಿಂದ ತುಪ್ಪದಿಂದಲೇ ಯಜ್ಞವನ್ನು ನೆರವೇರಿಸಬಹುದಾಗಿದೆ. ಅಹಿಂಸೆಯ ಮೂಲದೃಷ್ಟಿಯನ್ನು ಮರೆಯದೇ ಪಶುಗಳನ್ನು ರಕ್ಷಿಸಿ ಯಜ್ಞವನ್ನು ಮಾಡುವುದು ಅತ್ಯಂತ ಯುಕ್ತವಾಗಿದೆ.

★★★

ಐತರೇಯಬ್ರಾಹ್ಮಣವು(6.8) ಪುರುಷನಿಂದ ಆರಂಭಿಸಿ ಪ್ರಾಣಿಗಳ ವಿಶಸನವನ್ನು ವಿಶ್ಲೇಷಣೆ ಮಾಡುತ್ತಾ ಅಂತಿಮವಾಗಿ ಹಿಟ್ಟಿನಿಂದ ಮಾಡಿದ ಪಶುವಿನ ಹೋಮವನ್ನು ಅಂಗೀಕಾರ ಮಾಡಿದೆ– **''ಸಮೇಧೇನ ಹಾಸ್ಯ ಪಶುನೇಷ್ಟಂ ಭವತಿ ಕೇವಲೇನ ಹಾಸ್ಯ ಪಶುನೇಷ್ಟಂ ಭವತಿ ಯ ಎವಂ ವೇದ''**।

ವರಖೇಡಿ ತಿಮ್ಮಣ್ಣಾಚಾರ್ಯರು ಐತರೇಯ ಬ್ರಾಹ್ಮಣದ 6ನೇ ಅಧ್ಯಾಯದ ವಾಕ್ಯಖಂಡಗಳನ್ನು ಉದಾಹರಿಸಿ ಪಿಷ್ಟಪಶೂವಿನಿಂದಲೇ ಯಜ್ಞವನ್ನು ನಿರ್ವಹಿಸುವುದ ಸಮಂಜಸವೆಂದು ಉಪಪಾದಿಸಿದ್ದಾರೆ. ಇದೇ ಅಭಿಪ್ರಾಯಕ್ಕೆ ಪೋಷಕವಾದ ಶತಪಥ ಬ್ರಾಹ್ಮಣದ ವಾಕ್ಯಗಳನ್ನು ವಾಚಕರು ಗಮನಿಸಬಹುದು–

ಪುರುಷಂ ಹ ವೈ ದೇವಾ ಅಗ್ರೇ ಪಶುಮಾಲೇಭಿರೇ।
ತಸ್ಯಾಲಬ್ಧಸ್ಯ ಮೇಧೋಽಪಚಕ್ರಾಮ।

ಸೋಽಶ್ವಂ ಪ್ರವಿವೇಶ। ತೇಽಶ್ವಮಾಲಭಂತ।
ತಸ್ಯಾಲಬ್ಧಸ್ಯ ಮೇಧೋಽಪಚಕ್ರಾಮ।

ಸ ಗಾಂ ಪ್ರವಿವೇಶ। ತೇ ಗಾಮಾಲಭಂತ।
ತಸ್ಯಾಲಬ್ಧಸ್ಯ ಮೇಧೋಽಪಚಕ್ರಾಮ।

ಸೋಽವಿಂ ಪ್ರವಿವೇಶ। ತೇಽವಿಮಾಲಭಂತ।

ತಸ್ಯಾಲಬ್ಧಸ್ಯ ಮೇಧೋಽಪಚಕ್ರಾಮ ।
ಸೋಽಜಂ ಪ್ರವಿವೇಶ । ತೇಽಜಮಾಲಭಂತ

ತಸ್ಯಾಲಬ್ಧಸ್ಯ ಮೇಧೋಽಪಚಕ್ರಾಮ । ಸ ಇಮಾಂ ಪೃಥಿವೀಂ ಪ್ರವಿವೇಶ । ತಂ ಖನಂತ ಇವಾನ್ವೀಷುಃ । ತಮ್ ಅನ್ವವಿಂದನ್ । ತೌ ಇಮೌ ವ್ರೀಹಿಯವೌ ॥

ಸ ಯಾವದ್ವೀರ್ಯವದ್ಧ ಹ ವಾ ಅಸ್ಯ ಏತೇ ಸರ್ವೇ ಪಶವ ಆಲಬ್ಧಾಃ ಸ್ಯುಃ ತಾವದ್ವೀರ್ಯವದ್ಧಾಸ್ಯ ಹವಿರೇವ ಭವತಿ । ಯ ಏವಮೇತದ್ವೇದ । ಅತ್ರೋ ಸಾ ಸಂಪದ್ಯದಾಹುಃ ಪಾಂಕ್ತಃ ಪಶುರಿತಿ । (ಶತಪಥ ಬ್ರಾ. 1.2.1.6.9)

ಇದರ ಸಾರವು ಹೀಗಿದೆ- ದೇವತೆಗಳು ಮೊದಲು ಪುರುಷನನ್ನು ಯಜ್ಞದಲ್ಲಿ ಪಶುವಾಗಿ ಬಳಸಿದರು. ಅಲ್ಲಿರುವ ಯಜ್ಞಸಾರವು ಪುರುಷನನ್ನು ತೊರೆದು ಅಶ್ವವನ್ನು ಪ್ರವೇಶಿಸಿತು. ಹೀಗೆ ಕ್ರಮವಾಗಿ ಬೇರೆ ಬೇರೆ ಪಶುಗಳನ್ನು ತೊರೆದು ಅಂತಿಮವಾಗಿ ವ್ರೀಹಿ- (ಭತ್ತ), ಯವ-(ಗೋಧಿ) ಗಳಲ್ಲಿ ಅವುಗಳಿಂದ ಸಿದ್ಧಪಡಿಸಿದ ಪಶ್ವಾಕೃತಿಗಳಿಂದ ಹೋಮವು ಅಂಗೀಕೃತವಾಯಿತು. ಗೋಪಥಬ್ರಾಹ್ಮಣವು- ಓಷಧೀಷ್ವೇವ ಯಜ್ಞಂ ಪ್ರತಿಷ್ಠಾಪಯತಿ ।(ಗೋ.ಬ್ರಾ. ಉ.ಪ್ರ. 2.13) ಪಶವೋ ವೈ ಧಾನಾಃ(ಗೋ.ಬ್ರಾ. ಉ.ಪ್ರ4.6) ಓಷಧಿಗಳಲ್ಲಿ (ಧಾನ್ಯಗಳಲ್ಲಿ) ಯಜ್ಞವು ಪ್ರತಿಷ್ಠಿತವಾಗಿದೆ. ಧಾನ್ಯಗಳೇ ಪಶುಗಳ ಸ್ಥಾನವನ್ನು ಅಲಂಕರಿಸಿವೆ ಇತ್ಯಾದಿಯಾಗಿ ಪಿಷ್ಟಪಶುವಿನಿಂದಲೇ ಯಜ್ಞಗಳ ನಿರ್ವಾಹವನ್ನು ಅಂಗೀಕರಿಸಿವೆ.

ಇತಿಹಾಸಪುರಾಣಗಳ ಬೆಳಕು

ಮೇಲೆ ತಿಳಿಸಿದ ವಚನಗಳಲ್ಲದೇ ಪುರಾಣ ಗಳನ್ನು ಅಧ್ಯಯನ ಮಾಡುವಾಗ ನಮಗೆ ಸ್ಪಷ್ಟವಾದ ಬೆಳಕು ದೊರಕುವುದು.

ಮಹಾಭಾರತದ ಶಾಂತಿಪರ್ವವು ಇದರ ಬಗ್ಗೆ ಸ್ಪಷ್ಟವಾದ ನಿದೇಶನವನ್ನು ನೀಡುತ್ತಿದೆ.

‘‘ಯಜ್ಞಗಳಲ್ಲಿ ವ್ಯರ್ಥವಾಗಿ ಮಾಂಸವನ್ನು ಭಕ್ಷಿಸುವುದು, ಮದ್ಯ-ಮಾಂಸಗಳ ಸ್ವೀಕಾರಗಳು ವಂಚಕರಿಂದ ಆರಂಭಿಸಲ್ಪಟ್ಟಿವೆ. ಪ್ರಮಾಣಗಳ ಅಜ್ಞಾನದಿಂದ ಭ್ರಾಂತಿಯಿಂದ ವಿಷಯಪದಾರ್ಥಗಳ ಲೋಲುಪತೆಯಿಂದ ಇದೆಲ್ಲ ಸಂಭವಿಸಿದೆ. ಸಾತ್ವಿಕಜ್ಞಾನಿಗಳು ಪಾಯಸ-ಹೂವುಗಳು ಮುಂತಾದವುಗಳಿಂದ ವಿಷ್ಣುವನ್ನು ಆರಾಧಿಸುತ್ತಾರೆ.(ಮಹಾಭಾರತ ಶಾಂತಿಪರ್ವ, ಅ-271, ಶ್ಲೋ. 10-12)

‘‘ಯದಿ ಛಿಂದಂತಿ ವೃಕ್ಷಾಂಶ್ಚ ಯೂಪಾಂಶ್ಚೋದ್ದಿಶ್ಯ ಮಾನವಾಃ ।
ವೃಥಾ ಮಾಂಸಾನಿ ಖಾದಂತಿ ನೈಷ ಧರ್ಮಃ ಪ್ರಶಸ್ಯತೇ ।

ಸುರಾಂ ಮತ್ಸ್ಯಾನ್ ಮಧು ಮಾಂಸಮ್ ಆಸವಂ ಕೃಸರೌದನಮ್ ।
ಧೂರ್ತೈಃ ಪ್ರವರ್ತಿತಂ ಹ್ಯೇತನ್ನೈತದ್ವೇದೇಷು ಕಲ್ಪಿತಮ್ ।

ಮಾನಾನ್ಮೋಹಾಚ್ಚ ಲೋಭಾಚ್ಚ ಲೌಲ್ಯಮೇತತ್ ಪ್ರವರ್ತಿತಮ್ ।
ವಿಷ್ಣುಮೇವಾಭಿಜಾನಂತಿ ಸರ್ವಯಜ್ಞೇಷು ಬ್ರಾಹ್ಮಣಾಃ ।

ಪಾಯಸೈಃ ಸುಮನೋಭಿಶ್ಚ ತಸ್ಯೈವ ಯಜನಂ ಸ್ಮೃತಮ್ ।
ಆಲಂಭಸಮಯೇ ತಸ್ಮಿನ್ ಗೃಹೀತೇಷು ಪಶುಷ್ವಥ ।
ಮಹರ್ಷಯೋ ಮಹಾರಾಜ ! ಬಭೂವುಃ ಕೃಪಯಾನ್ವಿತಾಃ ॥

ತತೋ ದೀನಾನ್ ಪಶೂನ್ ದೃಷ್ಟ್ವಾ ಋಷಯಸ್ತೇ ತಪೋಧನಾಃ ।
ಊಚುಃ ಶಕ್ರಂ ಸಮಾಗಮ್ಯ ನಾಯಂ ಯಜ್ಞವಿಧಿಃ ಶುಭಃ ॥

ಮಹಾಭಾರತದ ಅಶ್ವಮೇಧಪರ್ವದ 93ನೇ ಅಧ್ಯಾಯದಲ್ಲಿ ‘ಯಜ್ಞದಲ್ಲಿ ಪಶುಗಳನ್ನು ವಿಶಸನಕ್ಕಾಗಿ ತಂದಾಗ ಕರುಣಾಳುಗಳಾದ ಋಷಿಗಳು ಇದು ಧರ್ಮವಲ್ಲವೆಂದು ತಮ್ಮ ವಾದವನ್ನು ಮಂಡಿಸಿದರು. ಇದು ಇಂದ್ರನಿಗೆ

ರುಚಿಸಲಿಲ್ಲ'. ಇದರಿಂದ ತಿಳಿದುಬರುವುದೇನೆಂದರೆ ಪಶು ಹತ್ಯೆಯು ಜ್ಞಾನಿಗಳಿಗೆ ಸಮ್ಮತವಲ್ಲ.

ಭಾಗವತದ ಉತ್ತರಭಾರತದ ಪಾಠದಲ್ಲಿ ಈ ಕೆಳಕಂಡ ಶ್ಲೋಕಗಳನ್ನು ನಾವು ಕಾಣಬಹುದಾಗಿದೆ. ಇದರ ಅಭಿಪ್ರಾಯವು ಹೀಗಿದೆ- 'ಶ್ರಾದ್ಧದಲ್ಲಿ ಮಾಂಸವನ್ನು ಬಳಸಬಾರದು. ಮುನಿಗಳು ಸ್ವೀಕರಿಸುವ ಗೆಡ್ಡೆ-ಗೆಣಸುಗಳಿಂದ, ಧಾನ್ಯಗಳಿಂದ ಪಿತೃಗಳಿಗೆ ಹಾಗೂ ದೇವತೆಗಳಿಗೆ ಪ್ರೀತಿ ಆಗುವಕಾರಣ ಅದರಿಂದಲೇ ಶ್ರಾದ್ಧ-ಹೋಮಗಳನ್ನು ಮಾಡಬಹುದು. ಮನಸ್ಸು, ಮಾತು ಹಾಗು ದೇಹಗಳಿಂದ ಹಿಂಸೆ ಮಾಡದಿರುವುದೇ ಪರಮೋಚ್ಚಧರ್ಮವಾಗಿದೆ.

''ನ ದದ್ಯಾದಾಮಿಷಂ ಶ್ರಾದ್ಧೇ ನ ಚಾದ್ಯಾದ್ ಧರ್ಮತತ್ತ್ವವಿದ್ ।
ಮುನ್ಯನ್ನೈಃ ಸ್ಯಾತ್ಪರಾ ಪ್ರೀತಿರ್ಯಥಾ ನ ಪಶುಹಿಂಸಯಾ ॥

ನೈತಾದೃಶಃ ಪರೋ ಧರ್ಮೋ ನೃಣಾಂ ಸದ್ಧರ್ಮಮಿಚ್ಛತಾಮ್ ।
ನ್ಯಾಸೋ ದಂಡಸ್ಯ ಭೂತೇಷು ಮನೋವಾಕ್ಕಾಯಕರ್ಮಜಸ್ಯ ಯಃ ॥''

(ಇತಿ ಶ್ರೀಮದ್ಭಾಗವತ- 7.15.7-8)

ಸ್ಕಾಂದಪುರಾಣದ ವೈಷ್ಣವಖಂಡಲ್ಲಿರುವ ವಾಸುದೇವ ಮಾಹಾತ್ಮ್ಯೆಯಲ್ಲಿ (ಅಧ್ಯಾಯ-6) ಸಾತ್ವಿಕದೇವತೆಯಾದ ವಿಷ್ಣುವಿಗೆ ಅಹಿಂಸಾತ್ಮಕವಾದ ಯಜ್ಞವೇ ಪ್ರಿಯವಾಗಿದೆ. ಪಶುವಿಶಸನವು ವಿಪರೀತಧರ್ಮವಾಗಿದೆ. ಇದು ಅನುಷ್ಠಾನ ಯೋಗ್ಯವಲ್ಲ ಎಂಬ ನಿರೂಪಣೆ ಇದೆ.

'ಸಾತ್ವಿಕಾನಾಂ ಹಿ ಯೋ ದೇವಃ ಸಾಕ್ಷಾತ್ ವಿಷ್ಣೂ ರಮಾಪತಿಃ ।
ಅಹಿಂಸಯಜ್ಞೇಽಸ್ತಿ ತತೋ ಅಧಿಕಾರಸ್ತಸ್ಯ ತುಷ್ಟಯೇ ॥

ಪ್ರತ್ಯಕ್ಷಪಶುಮಾಲಭ್ಯ ಯಜ್ಞಸ್ಯಾಚರಣಂ ತು ಯತ್ ।
ಧರ್ಮಃ ಸ ವಿಪರೀತೋ ವೈ ಯುಷ್ಮಾಕಂ ಸುರಸತ್ತಮಾಃ ॥

ತಸ್ಯ ಯಜ್ಞೋ ಮಹಾನಾಸೇದಶ್ವಮೇಧೋ ಮಹಾತ್ಮನಃ ।
ಬೃಹಸ್ಪತಿರುಪಾಧ್ಯಾಯಸ್ತತ್ರ ಹೋತಾ ಬಭೂವ ಹ ।
ಪ್ರಜಾಪತಿಸುತಾಶ್ಚಾತ್ರ ಸದಸ್ಯಾಶ್ಚಾಽಭವಂಸ್ತ್ರಯಃ ॥

ಏಕತಶ್ಚ ದ್ವಿತಶ್ಚೈವ ತ್ರಿತಶ್ಚೈವ ಮಹರ್ಷಯಃ ।
ಧನುಷಾಖ್ಯೋಽಥ ರೈಭ್ಯಶ್ಚ ಅರ್ವಾವಸುಪರಾವಸೂ ।

ಋಷಿರ್ಮೇಧಾತಿಥಿಶ್ಚೈವ ತಾಂಡ್ಯಶ್ಚೈವ ಮಹಾನೃಷಿಃ ।
ಋಷಿಃ ಶಾಂತಿರ್ಮಹಾಭಾಗಸ್ತಥಾ ವೇದಶಿರಾಶ್ಚ ಯಃ ॥

ಋಷಿಶ್ರೇಷ್ಠಶ್ಚ ಕಪಿಲಃ ಶಾಲಿಹೋತ್ರಪಿತಾ ಸ್ಮೃತಃ ।
ಆದ್ಯಃ ಕಠಸ್ತೈತ್ತಿರಿಶ್ಚ ಏತೇ ಷೋಡಶ ಋತ್ವಿಜಃ ॥

ಸಂಭೂತಾಃ ಸರ್ವಸಂಭಾರಾಸ್ತಸ್ಮಿನ್ ರಾಜನ್ಮಹಾಕ್ರತೌ ॥
ನ ತತ್ರ ಪಶುಘಾತೋಽಭೂತ್ ಸ ರಾಜೈವಂ ಸ್ಥಿತೋಽಭವತ್ ॥

(ಮ.ಭಾರತ, ಶಾಂ. ಪರ್ವ)

ಸೂತ ಉವಾಚ-

ಮಂತ್ರಾನ್ವೈ ಯೋಜಯಿತ್ವಾ ತು ಇಹಾಮುತ್ರ ಚ ಕರ್ಮಸು ।
ತಥಾ ವಿಶ್ವಭುಗಿಂದ್ರಸ್ತು ಯಜ್ಞಂ ಪ್ರಾವರ್ತಯತ್ಪ್ರಭುಃ ॥

ದೈವತ್ಯೈಃ ಸಹ ಸಂಹೃತ್ಯ ಸರ್ವಸಾಧನಸಂವೃತಃ ।
ತಸ್ಯಾಶ್ವಮೇಧೇ ವಿತತೇ ಸಮಾಜಗ್ಮುರ್ಮಹರ್ಷಯಃ ॥

ಯಜ್ಞಕರ್ಮಣ್ಯವರ್ತಂತ ಕರ್ಮಣ್ಯಗ್ರೇ ತಥರ್ತ್ವಿಜಃ ।
ಹೂಯಮಾನೇ ದೇವಹೋತ್ರೇ ಅಗ್ನೌ ಬಹುವಿಧಂ ಹವಿಃ ॥

ಸಂಪ್ರತೀತೇಷು ದೇವೇಷು ಸಾಮಗೇಷು ಚ ಸುಸ್ವರಮ್ ।
ಪರಿಕ್ರಾಂತೇಷು ಲಘುಷು ಅಧ್ವರ್ಯುಪುರುಷೇಷು ಚ ॥

ಆಲಬ್ಧೇಷು ಚ ಮಧ್ಯೇ ತು ತಥಾ ಪಶುಗಣೇಷು ಚ ।
ಆಹೂತೇಷು ಚ ದೇವೇಷು ಯಜ್ಞಭುಕ್ಷು ತತಸ್ತದಾ ॥

ಯ ಇಂದ್ರಿಯಾತ್ಮಕಾ ದೇವಾ ಯಜ್ಞಭಾಗಭುಜಸ್ತು ತೇ ।
ತಾನ್ಯಜಂತಿ ತದಾ ದೇವಾಃ ಕಲ್ಪಾದಿಷು ಭವಂತಿ ಯೇ ॥

ಅಧ್ವರ್ಯುರ್ಪೈಷಕಾಲೇ ತು ವ್ಯುತ್ಥಿತಾ ಋಷಯಸ್ತಥಾ ।
ಮಹರ್ಷಯಶ್ಚ ತಾನ್ ದೃಷ್ಟ್ವಾ ದೀನಾನ್ ಪಶುಗಣಾಂಸ್ತದಾ ॥

ವಿಶ್ವಭುಜಂ ತೇ ತ್ವಪೃಚ್ಛನ್ ಕಥಂ ಯಜ್ಞವಿಧಿಸ್ತವ ॥......
ತಸ್ಮಾನ್ನ ಹಿಂಸಾ ಯಜ್ಞೇ ಸ್ಯಾದ್ಯದುಕ್ತಮೃಷಿಭಿಃ ಪುರಾ ।
ಋಷಿಕೋಟಿಸಹಸ್ರಾಣಿ ಸ್ವೈಸ್ತಪೋಭಿರ್ದಿವಂಗತಾಃ ॥

ತಸ್ಮಾನ್ನ ಹಿಂಸಾಯಜ್ಞಂ ಚ ಪ್ರಶಂಸಂತಿ ಮಹರ್ಷಯಃ ।
ಉಚ್ಛಂ ಮೂಲಂ ಫಲಂ ಶಾಕಮುದಪಾಗ್ರಂ ತಪೋಧನಾಃ ॥

ಏತದ್ಕೃತ್ವಾ ವಿಭವತಃ ಸ್ವರ್ಗಂ ಲೋಕಂ ಪ್ರತಿಷ್ಠಿತಾಃ ।
ಅದ್ವೇಗಶ್ಚಾಪ್ಯಲೋಭಶ್ಚ ದಮೋ ಭೂತದಯಾ ಶಮಃ ॥

ಬ್ರಹ್ಮಚರ್ಯಂ ತಪಃ ಶೌಚಮನುಕ್ರೋಶಂ ಕ್ಷಮಾ ಧೃತಿಃ ।
ಸನಾತನಸ್ಯ ಧರ್ಮಸ್ಯ ಮೂಲಮೇತದ್‌ದುರಾಸದಮ್ ॥
(ಮತ್ಸ್ಯಪುರಾಣ. ಅ- 143)

ಮೇಲೆ ಉಲ್ಲೇಖಿಸಿದ ಮಹಾಭಾರತದ 334ನೇ ಅಧ್ಯಾಯದಲ್ಲಿ ಬೃಹಸ್ಪತ್ಯಾಚಾರ್ಯರ ಅಧ್ಯಕ್ಷತೆಯಲ್ಲಿ ಹದಿನಾರು ಜನ ಶ್ರೇಷ್ಠ ಋಷಿಗಳು ನೆರವೇರಿಸಿದ ಯಜ್ಞದಲ್ಲಿ ಪಶುವನ್ನು ವಿಶಸನ ಮಾಡದೆಯೇ ಕೇವಲ ಧಾನ್ಯಸಾರದಿಂದ ಯಜ್ಞವನ್ನು ನಡೆಸಿದ ಉಲ್ಲೇಖವನ್ನು ಕಾಣುತ್ತೇವೆ. ಇದರಂತೆ ಮತ್ಸ್ಯ ಪುರಾಣದಲ್ಲಿ ದೇವತೆಗಳು-ಋಷಿಗಳು ಚರ್ಚಿಸಿ ಅನಂತರದಲ್ಲಿ ಹಿಂಸಾಯಜ್ಞವನ್ನು ಮಾಡದಿರುವುದೇ ಯುಕ್ತ ವೆಂದು ತೀರ್ಮಾನಿಸಲಾಗಿದೆ. ತರಕಾರಿಗಳು, ಹಣ್ಣುಗಳು, ಧಾನ್ಯಗಳಿಂದ ಯಜ್ಞವನ್ನು ನಡೆಸುವುದೇ ಉತ್ತಮವೆಂದು ತೀರ್ಮಾನಿಸಲಾಯಿತು. ಆದ್ದರಿಂದ ಇನ್ನೊಬ್ಬರಿಗೆ ದ್ರೋಹ ಮಾಡದಿರುವುದು, ಇನ್ನೊಬ್ಬರ ವಸ್ತುವನ್ನು ಬಯಸದಿರುವುದು,

ಇಂದ್ರಿಯನಿಗ್ರಹ, ಪ್ರಾಣಿದಯೆ, ದೇವರಲ್ಲಿ ಭಕ್ತಿ, ಬ್ರಹ್ಮಚರ್ಯ ಮೊದಲಾದ ಸದ್ಗುಣಗಳನ್ನು ಅಳವಡಿಸಿಕೊಳ್ಳುವುದೇ ಧರ್ಮದ ಮೂಲತತ್ತ್ವವೆಂದು ನಿರ್ಣಯಿಸಲಾಯಿತು. ಇದರಿಂದ ತಿಳಿದುಬರುವ ಸಂಗತಿ ಏನೆಂದರೆ ಪಶುಹಿಂಸೆಯು ಯೋಗ್ಯವಲ್ಲ.

ಇದೇ ಅಭಿಪ್ರಾಯದಿಂದ ಮಹಾಭಾರತದ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ನೀಲಕಂಠದೀಕ್ಷಿತರು ಗೃಹ್ಯಗ್ರಂಥಗಳಲ್ಲಿ ಪಶುವಿನ ಬದಲು ಧಾನ್ಯದ ಹಿಟ್ಟಿನಿಂದ ಯಜ್ಞವನ್ನು ಮಾಡುವುದೇ ಸಮುಚಿತವೆಂದು ವ್ಯಾಖ್ಯಾನಿಸಿದ್ದಾರೆ-

ಅತ್ರ ಆಖ್ಯಾಯಿಕಾತಾತ್ಪರ್ಯಂ ಪಶುಕಾರ್ಯೇ ಶ್ಯಾಮಾಕಾದಿವಿಕಾರಾಂಶ್ಚರುಪುರೋಡಾಶಾದೀನ್ ಕುರ್ಯಾದಿತಿ ಗಮ್ಯತೇ । ತಥಾ ಚ ಗೃಹ್ಯೇ ''ಅಥ ಶ್ವೋ ಭೂತೇಷ್ಟಕಾಃ ಪಶುನಾ ಸ್ಥಾಲೀಪಾಕೇನ ವಾ'' ಇತಿ ಪಶುಸ್ಥಾನೇ ಸ್ಥಾಲೀಪಾಕೋಽಪಿ ವಿಧೀಯತೇ । ಏವಮನ್ಯತ್ರ ಪುರೋಡಾಶಾಮಿಕ್ಷಾದೀನಾಮಪಿ ಪಶುಸ್ಥಾನೇ ವಿಧಾನಮವಗಂತವ್ಯಮ್ । ತಸ್ಮಾನ್ನ ಹಿಂಸಾ ಯಜ್ಞಃ ಶ್ರೇಯಾನಿತಿ ಯಜ್ಞನಿಂದೇತ್ಯಧ್ಯಾಯ ನಾಮ ತತ್ರ ಹಿಂಸಾಯಜ್ಞನಿಂದೇತ್ಯವಗಂತವ್ಯಮ್ ॥ (ಮ.ಶಾಂ.ಪ-ಅ.272)

ಕೃತಜ್ಞತಾ ಸಮರ್ಪಣೆ

ಈ ಸಂದರ್ಭದಲ್ಲಿ ಪರಮಪೂಜ್ಯ ಗುರುಗಳಾದ ನ್ಯಾಯ-ವೇದಾಂತಶಾಸ್ತ್ರಗಳ ಉದ್ಗ್ರಂಥವನ್ನು ಪಾಠಮಾಡಿದ ಕೀರ್ತಿಶೇಷ **ಶ್ರೀವಿಶ್ವೇಶತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರ** ಪಾದಕಮಲಗಳಲ್ಲಿ ಭಕ್ತಿಪೂರ್ಣವಾದ ಸಾಷ್ಟಾಂಗಪ್ರಣಾಮಗಳನ್ನು ಅರ್ಪಿಸುತ್ತೇನೆ.

ಪರಮಪೂಜ್ಯ ಗುರುಗಳ ಪ್ರತಿಬಿಂಬರಾದ **ಶ್ರೀವಿಶ್ವಪ್ರಸನ್ನ ತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರು** ಎಲ್ಲ ಸಂಶೋಧನ ಕಾರ್ಯಗಳಿಗೆ

ನಿರಂತರ ಪ್ರೋತ್ಸಾಹವನ್ನು ನೀಡುತ್ತಿದ್ದು, ವಾತ್ಸಲ್ಯದ ಧಾರೆಯನ್ನು ನಮ್ಮಲ್ಲಿ ಹರಿಸುತ್ತಿದ್ದಾರೆ. ಅವರ ಅನುಗ್ರಹದ ಫಲವಾಗಿ ಈ ಕೃತಿಗಳು ಮುದ್ರಣಗೊಳ್ಳುತ್ತಿದೆ. ಅವರಿಗೆ ನನ್ನ ಭಕ್ತಿಪೂರ್ವಕ ಸಾಷ್ಟಾಂಗಪ್ರಣಾಮಗಳು.

ಉತ್ತಮಶರೀರ-ಸಂಸ್ಕಾರಗಳನ್ನು ನೀಡಿ ಹರಸಿದ ಶ್ರೀವೈಶಂಪಾಯನಾಚಾರ್ಯ-ರಮಾಬಾಯಿ ಇವರಿಗೆ ಸಾಷ್ಟಾಂಗ ನಮನಗಳು.

ಈ ಕೃತಿಯ ಶೋಧನೆಯಲ್ಲಿ ಅರ್ಥವಾಗದ ಕೆಲವು ಭಾಗದ ಶೋಧನೆಯನ್ನು ಡಾ. ವೀರನಾರಾಯಣಾಚಾರ್ಯ ಪಾಂಡುರಂಗಿಯವರು ಮಾಡಿಕೊಟ್ಟಿದ್ದಾರೆ. ಅವರಿಗೆ ನಾನು ಋಣಿಯಾಗಿದ್ದೇನೆ. ಆದರೂ ಇನ್ನೂ ಕೆಲವು ಕಡೆಗಳಲ್ಲಿ ಸಂದೇಹಗಳು ಇವೆ. ಅನವಧಾನ-ಅಜ್ಞಾನಗಳಿಂದ ಉಳಿ ದಿರುವ ದೋಷಗಳನ್ನು ವಿದ್ವಾಂಸರು ಪರಿಹರಿಸಬೇಕಾಗಿ (ಗಮನಕ್ಕೆ ತರಬೇಕಾಗಿ) ವಿನಂತಿಸುತ್ತೇನೆ. ಡಾ. ಶ್ರೀನಿಧಿವಾಸಿಷ್ಠ ಇವರು ತಮ್ಮ ಸಂಗ್ರಹದಲ್ಲಿರುವ ವೈಶ್ವನಾಥೀ ನಾರಾಯಣಪಂಡಿತರ ಹಸ್ತಪ್ರತಿ ನೀಡಿದರು. ಅದರಿಂದ ಕೆಲವುಕಡೆ ಶುದ್ಧಪಾಠ ನೀಡಲು ಸಾಧ್ಯವಾಗಿದೆ. ಅವರ ಈ ಉಪಕಾರಕ್ಕೆ ನಾನು ಋಣಿ. ಉಳಿದ ಕೃತಿಗಳು ಅಂತರ್ಜಾಲ ಮಾಧ್ಯಮದಿಂದ ಪಡೆದವುಗಳು.

ಇಂತಹ ಕೃತಿಗಳ ಪ್ರಕಾಶನಕ್ಕೆ ಅಗತ್ಯವಿರುವ ಆರ್ಥಿಕ ನೆರವನ್ನು ನೀಡುವ ಮೂಲಕ, ಘನತೆವೆತ್ತ ಕರ್ನಾಟಕ ಸರಕಾರದ ಮಂತ್ರಿಮಂಡಲ ಹಾಗೂ ಅಧಿಕಾರಿವರ್ಗವು ಪ್ರೋತ್ಸಾಹವನ್ನು ನೀಡಿದೆ. ಸಂಸ್ಕೃತ-ಸಂಸ್ಕೃತಿಯನ್ನು ಮುಂದುವರೆಸುವಲ್ಲಿ ಅವರ ಯೋಗದಾನವನ್ನು ಸ್ಮರಿಸುತ್ತಾ ಅವರಿಗೆ ಧನ್ಯವಾದಗಳನ್ನು ಅರ್ಪಿಸುತ್ತೇನೆ. ಈ ಕೃತಿಯ ಟಂಕಣಕಾರ್ಯಹಾಗೂಮುದ್ರಣೋಪಯುಕ್ತವಿನ್ಯಾಸವನ್ನು

ಶ್ರದ್ಧೆಯಿಂದ ನೆರವೇರಿಸಿದ ವಿದ್ವಾನ್ ಪ್ರಸಾದ .ಪಿ. ಜಹಾಗಿರದಾರ್ ಇವರನ್ನು ಪ್ರೀತಿಯಿಂದ ಅಭಿನಂದಿಸುತ್ತೇನೆ.

ಈ ಕೃತಿಯ ಸುಂದರ ಮುದ್ರಣವನ್ನು ನಡೆಸಿಕೊಟ್ಟ ವಾಗರ್ಥ ಮುದ್ರಣಾಲಯದ ಶ್ರೀರಾಘವೇಂದ್ರ ಇವರಿಗೆ ಅಭಿನಂದನೆಗಳು.

ಡಾ. ಎ.ವಿ. ನಾಗಸಂಪಿಗೆ

ಗೌ॥ ನಿದೇಶಕರು

ಶ್ರೀವಿಶ್ವೇಶತೀರ್ಥಸಂಶೋಧನಕೇಂದ್ರ.

विषयानुक्रमणिका

।। १ ।। अथ विश्वनाथसूरिसूनुनारायणपण्डिताचार्यकृता पिष्टपशुमीमांसा ।।

१. (मङ्गलाचरणम्)

श्रीमत्पूर्णगुणार्णवस्य वदनात्साक्षात्परब्रह्मणो
निर्याता चतुराननादिदिविषद्वृन्दैः शिरोभिर्धृता ।
या लोकत्रितयं निजेष्टविषये सम्यङ् नियुङ्क्ते तथाऽ
निष्टादावपति स्वकेव जननी सा मे प्रमाणं श्रुतिः ।।

२. (शास्त्राणां भगवत्स्वरूपविज्ञानार्थं प्रवृत्तिः)

इह खलु नानाविधदुःखसङ्कटदुर्गमे संसारकान्तारे निमग्नानाम ल्पास्थिरसुख खद्योतिकासु द्योतमानास्वपि मनःप्रसादमना सादयताम धिकारिणां तन्निवृत्तये परमानन्दावाप्तये च सकलश्रुति स्मृतीतिहासपुराणानां [1]तदुपकरणीभूतब्रह्ममीमांसायाश्च सकल पुरुषार्थोत्तममोक्षप्रदभ गवत्स्वरूपज्ञापनार्थं प्रवृत्तिरिति तत्त्वम्।

३. (श्रवणादिरूपः ब्रह्मविचारः कर्तव्यः)

'तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते'(तै.आ. ३.१.३) इति श्रुतेः । तच्च [2]ब्रह्मापरोक्षं ज्ञान मुपासनैकसाध्यमिति तदर्थं श्रवणादिरूपो ब्रह्मविचारः कर्तव्यः ।।

'आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्या सितव्यः'(बृह- २.४.५) इति श्रुतेः ।।

४. (अन्तःकरणशुद्ध्यर्थं नित्यनैमित्तिककर्माणि)

तत्र चानादिवासनामलीनचित्तानामंपरिपक्ककषायाणां विना विषयवैराग्यं न [3]प्रवृत्तिः, तदर्थं विषयानित्यत्वमुपदिश्यमानमपि

---

१ **तदुपकारीभूत इति मुद्रिते ।** तदुपकरणीभूत- श्री
२ **ब्रह्मापरोक्षज्ञानम् इति पाठः साधुः ।**
३ **प्रवृत्तेः इति मु.पा । प्रवृत्तिः- श्री**

[४]तावच्चेतसि न प्रतिबिम्बत्येवं [५]''यावन्न तत्र मालिन्यमपसरति' इत्यत आदर्शस्येवाऽन्तःकरणस्य शुद्धिरपेक्षितेति । तदर्थं नित्यनैमित्तिकक र्मविधयः प्रवर्तन्ते । कर्मणा ह्यन्तःकरणशुद्धौ सत्यां तत्र शुद्धादर्श इव शास्त्रार्थोपदेशः प्रतिफलति तथा च श्रुतिः-

'कर्मणा [६]ज्ञानमाप्नोति ज्ञानेनामृतीभवति' ।

५. (द्विविधं कर्म विहितानुष्ठानं निन्दितवर्जनं चेति)

तच्च द्विविधं कर्म विहितानुष्ठानं, निषिद्धपरिवर्जनं चेति ।। तत्र नित्यानि अग्निहोत्रं, दर्शपूर्णमासौ, चातुर्मास्यानि पशुः सोम इत्यादीनि। नैमित्तिकानि तु जातेष्ट्यादीनि 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' [७]इतीष्ट्यादेः तेष्वेतेषु कर्मसु [८]सत्यधिकारेऽनुष्ठाने प्रत्यवेतीत्यधिकार आवश्यकः । स च कश्चित्पुरुषप्रयत्नसाध्यः कश्चिच्च ज्ञानसाध्यः ।। तथाहि-

''अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तः
कर्मण्यधिक्रियत इति सर्वतान्त्रिकसम्मतम्'' ।।

(ऋ.सं- १.१२.७२.)

६. (ब्रह्मगोवधादीनि श्रुतिविहितानीति पूर्वपक्षः)

अर्थित्वं च फलकामना । सा च विषयसौन्दर्यलभ्येति वैषयिकाणां स्वर्गादौ, विरक्तानां तु परमानन्दरूपमोक्ष इति तत्र यत्नः प्रयोजकः । सामर्थ्यं पुनर्द्विविधम् करणपाटवं वित्ताभिजनसंपत्तिश्च । तत्राद्यमपि स्वयत्नासाध्यम् । मूकान्धपङ्गुबधिरादीनां हि अनुमन्त्रणाज्यावेक्षणविष्णु क्रमणाद्यसामर्थ्यान्नाधिकारः । द्वितीयं तु यत्नसाध्यम् । वित्ताभिजन संपत्तेः कर्तुं शक्यत्वात् । वैदुष्यं तु ब्रह्मचर्याङ्गकस्वाध्यायाध्ययन

४ यावत् इति साधुः ।
५ तावत् इति स्यात् ।
६. ज्ञानमाप्नोति । ज्ञानमातनोति श्री ।
७ इष्ट्यादीनि इति पाठः सम्भाव्यते ।
८ सत्यधिकारेऽननुष्ठाने इति पाठः स्यात् ।

साध्यज्ञानव त्ता, सापि यत्नसाध्यैव । [९]चतुर्थं तु 'पातित्याद्यभावरूपं निषिद्धवर्जनसाध्यम्' इत्येतदपेक्षितमेव । अत एव हि ईदृशसाधनस म्पत्तिमतामनुष्ठितान्यपि महाहिंसारूपाण्यपि ब्रह्मवधगोवधाश्ववधादीनि परमाभ्युदयसाधनान्येवेति भगवदाज्ञारूपा । भगवती श्रुतिराह-

'ब्रह्मणे ब्राह्मणमालभेत' । इति ।।

मधुपर्काश्वमेधादौ च [१०]गवाश्वादीनीति, सौत्रामण्यां च सुराग्रहादिकं दृश्यते हि [११]श्लोके केवल[१२]सर्पमात्रस्य आदानमात्रेणैव मरणहेतोः कालकूटस्य वैद्यकशास्त्रोक्तभावनापरिकल्पितस्य राजयक्ष्मादिनिवर्तनद्वारा तुष्टिपुष्ट्यादिहेतुत्वमिति नास्तिकवादो न युक्तः । दावदग्धे वेत्रबीजादौ कदलीकाण्डजनकत्वदर्शनेन सहकारिसामर्थ्यात्पदार्थानां विचित्रशक्तिमत्तासद्भावात् । एवं च स्थितमेतावत् यदेतेषु उक्तविधेषु नित्यनैमित्तिककर्मसु यथोक्त साधनसम्पत्तिमत्ता समनुष्ठितकर्मवत् क्रियमाणस्य हिंसादेर्वैधत्वेन तत्र प्रत्यवायाभावोऽभ्युदयासिद्धिश्च । तत्रैव च मांसभक्षणमपि न प्रत्यवायहेतुः । वैगुण्ये च कर्मणो वैधत्वाभावेन महाननर्थः।

न हि यथोक्ताधानसाध्याहवनीयाद्यभावे यथोक्ताध्ययनादिजन्य ज्ञानाभावेऽपि लौकिकाग्निज्ञानमात्रेण कर्माण्यनुष्ठातुर्न हिंसादिजन्या नर्थ इति युज्यते । अन्यथा स्वर्गकामत्वरूपविशेषणसद्भावेन शूद्रादेरपि ज्योतिष्टोमाद्यधिकारापत्त्याऽग्निविद्यासाध्यकर्मणि शूद्रादे रवैधत्वेन अग्निहीनत्वेन च नाधिकार इति [१३]षाष्ठायि शूद्राधिकरणन्यायो[१४] विरुध्यते । यथा हि महाविषसाध्येषु रसायनेषु वैद्यकशास्त्रोक्ततत्तदनुपानादि साधनसम्पत्तिवैगुण्येन निष्फलत्वमनर्थ हेतुत्वं च दृश्यते तादृगेवामुत्रापि

९ अत्र वाक्यद्वयं गलितमिव भाति ।
१० गवाश्वालम्भनादीनि इति पाठः स्यात् ।
११ लोके इति स्यात्।
१२ सर्षपमात्रस्य इति स्यात् ।
१३ षाष्ठिकाप शूद्राधिकरण इति पाठः स्यात्।
१४ ६.१.७.

। तदेवं शास्त्रार्थे स्थिते इदं विचार्यते- 'इह परमनास्तिकपाखण्डादि भूयिष्ठतमोगुणैकप्रधाने कलियुगे कथमेतेषां लोकानामाधिकार इति ।

७. (कलियुगे पशुवधादावनधिकारव्यवस्थापनम्)

तत्र तावदनधिकार [१५]एव । तथाहि-

'अग्निहोत्रं गवालम्भं सन्न्यासं पलपैत्रकम् ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत्' ।।

इति न्यायमूलकवाक्येनाग्निहोत्रोपलक्षितश्रौतकर्मणां निषेधः प्रतीयते । गवालम्भो मधुपर्के । स्वभावेनापि जिह्वालाल्यवानयं लोको [१६]यथाकथञ्चिच्छास्त्रावष्टरसं पुरस्कृत्य सपिण्डासपिण्डाज्ञप्ता नाज्ञप्तेष्वपि दारेषु विचरन् नानाविधमद्यमांसादि खादन् दण्डार्थ मुद्यतान् राजादीन् प्रत्यपि धर्मध्वजाविष्करणेन

'अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा धृताभ्यक्त ऋतावियात् ।।

आगर्भसंभवाद्गच्छेत्पतितस्त्वन्यथा भवेत् ।
अनेन विधिना जातः [१७]क्षेत्रजोऽस्य भवेत्सुतः ।।'

'सात्रौमण्यां सुराग्रहान् गृह्णन्ति ।' इति

'अग्नीषोमीयं पशुमालभेत' । इति च वाक्यानि प्रमाणयन् यथेष्टं विचरेदेव । तदर्थं च एताः स्मृतयो मुनिभिः प्रणीताः- **'कलौ पञ्च विवर्जयेत्'** इत्यादयः । यद्यपि विहितानुष्ठानाद्धर्मातिशयस्तथाऽपि एतद्युगोत्पन्नजनानां यथोक्ताग्निविद्यावित्ताधिकारवैगुण्य प्राचुर्यादवैधहिंसादिनाऽधर्मस्यैव भूयिष्ठतासंभवात् । नहि निश्चित महानर्थसाधने पाक्षिककिञ्चित्सुखसाधने च प्रेक्षावन्तः प्रवर्तयन्ति ।

---

१५. अनधिकार एवेति प्राप्तमित्याह- मुद्रिते ।
१६. यथाकथञ्चिच्छावष्टम्भम् इति स्यात् ।
१७. क्षेत्रज्ञो- मुद्रिते । क्षेत्रजो इति श्री कोशे ।

तदुक्तम्-

'मन्दाः सुमन्दमतयो मन्दभाग्या वृथोद्यमाः ।
प्रायेणाऽल्पायुषो मर्त्याः संभवन्ति कलौ युगे' ।। इति

(भाग-१.१.१०)

दृश्यन्ते हि बहुशः त्रिचतुरादिवर्षकमपि माणवकमुपनीयैव मेधाजननकर्मोत्तरकालं चतुर्थ एव दिने समावर्त्य पञ्चमदिने विवाहयन्तः । तत्र कुतस्त्यमुपाकर्म कुतस्तरां च वेदाध्ययनं कुतस्तमां च कर्मोपयिकं ज्ञानमिति ।।

८. (कलावपि अग्निहोत्रपशुवधादिकर्तव्यताशङ्का)

अत्रोच्यते- यद्यप्युक्तरीत्या न्यायमूलकनिषेधेनाननुष्ठानम् । तथाऽपि न्यायमूलकप्रतिप्रसववाक्येन तदनुष्ठानं संभवत्येव । तथाचोक्तम्-

'यावद्वर्णविभागोऽस्ति यावद्वेदो महीतले ।
अग्निहोत्रं च संन्यासं कलौ तावत्प्रवर्तयेत्' ।। इति

(यतिधर्मसङ्ग्रहः- पृ. २-३)

[१८]कलिवर्ज्यप्रकरणे च अग्निहोत्रहवण्याश्चलेदो लीढापरिग्रह[१९] इति । लेहमात्रवर्जनमपि लिङ्गम् । अन्यथाऽप्रसक्तप्रतिषेधापत्तेः । तत्र च कर्मणां नित्यवदाम्नानबलाद्यथाशक्तिपक्षोऽपि विध्यनुमत इति लभ्यते । 'यावज्जीवमग्निहोत्रं जुहोति' 'यावज्जीवं दर्शपूर्णमासौ' इत्यादि चोदनाभिर्यावज्जीवमनुष्ठानविधानात् नित्यतावगम्यते । नहि तत्र सायंप्रातःकालाद्यवच्छिन्नजीवनरूपनिमित्तवत्ता यथोक्तहोम्य संपत्तिः शक्याधिगमा । न च गुणानुरोधेन प्रधानबाधो युज्यते इति प्रतिनिध्युपादानमपि विधिरनुमन्यत एव । ननु तथापि

---

१८. कलिवर्ज्यप्रकरण इत्यारभ्य प्रतिषेधापत्तेः इत्यन्तो भागः श्रीकोशे नास्ति
१९. एवमत्र पाठः- 'अग्निहोत्रहवन्याश्च लेहो लीढापरिग्रहः' इति । 'अग्निहोत्रं हूयते यया सा अग्निहोत्रहवनी' अग्निहोत्रे उपयुज्यमानं होमपात्रमित्यर्थः ।

[२०]अग्निविधिकारमन्त्राणां प्रतिनिध्यभावस्य षष्ठे [२१]व्यवस्थापितत्वेन कथं प्रतिप्रसववाक्यादपि कर्मणि प्रवृत्तिः । किं च,

'निष्फलानि दुरन्तानि तुल्यायव्ययकानि च ।
विरुद्धानि च कार्याणि नारभेत विचक्षणः' ।।

इति न्यायात्, पूर्वोक्तवैद्यकशास्त्रोक्तरसायनदृष्टान्तेन च पाक्षिककिञ्चिच्छ्रेयोपेक्षया महान्तं हिंसादिजन्यानर्थं पश्यन् कथमिवोक्त कर्मानुष्ठानेष्वध्यवसायमपि विदधीतेति चेत् सत्यं तदेतत्सर्वं वैद्यकशास्त्रोक्तरसायनदृष्टान्तवदेवेत्यवेहि ।

९. (अधिकारिणां पशुविशसनादावधिकारसत्वेऽपि कलौ अधिकारिणामतिविरलत्वात् पशुविशसनमकार्यमिति समर्थनम्)

यो हि आधिगतशास्त्रार्थोऽपि वैद्यो महाविषसाध्यानि रसायनान्यनुतिष्ठति, स तु यथोक्तानुपानभावनादिसंस्कारकद्रव्यसंभारे सत्येव । यदा तु तादृक् सम्पत्तिं नाकलयति तदा तदनुकूलौषधिविशेषालाभे तस्मिन् प्रयोगे महाविषादिकं न प्रयुङ्क्ते । किन्तु स्वसम्पादितसंस्कारकद्रव्यसाध्यसंस्कारानुगुणं तथाविधमेव द्रव्यविशेषं समवधत्ते । तेन च राजयक्ष्मादेरनिवृत्तावपि तदपेक्षया क्षुद्ररोगा निवर्तन्त एव । यथा वा पञ्चाक्षरविद्यावत्सु य एव सम्यग्भूतविद्यायां निष्णातः स एव महाभूतोच्चाटनार्थं मन्त्रान् प्रयुङ्क्ते । यस्तु तादृक् स्वसामर्थ्यं [२२]स्वात्मनि नाकलयति स तु क्षुद्रभूतेष्वेव मन्त्रप्रयोगमातनोति । साहसेन तु विपरीतमातिष्ठन् भूतेनैव ग्रस्यत इति सार्वलोकिकव्यवहारसिद्धम् । तथैव प्रकृतेऽपि यथोक्तब्रह्मचर्याङ्गकाध्ययनसम्यग् ज्ञानवान् तथाविध [२३]परमान्तिकऋत्विक्

---

२०. अग्निविद्याधिकार इति स्यात् ।
२१. न देवताग्निशब्दक्रियमन्यार्थसंयोगात्- ६.३.९ ।
२२. त्वात्मनि इति मुद्रिते । स्वात्मनि इति श्री
२३. परमास्तिक इति स्यात् ।

सम्पत्तिमान् स्वस्वोचितवृत्त्युपार्जितन्यायागतवित्तसंपन्नः, [२४]दैवादापतितस्य क्वचित्प्रामादिकवैगुण्यादेः प्रतिविधान समर्थः, स सुखेनानुतिष्ठतु तत्तत्पशुसाध्ययागादीन् । तादृशश्चास्मिन् युगे दुर्लभ एव । लक्षकोटिषु मध्ये कदाचिदेको लभ्येत न वेति । यत्तु न तादृशः कथञ्चित्प्रयोगपर्याप्तज्ञानो यथाशक्ति कथञ्चित्संपन्न वित्तादिः स तु सुखेनाग्निहोत्रदर्शपौर्णमासचातुर्मास्यादीनि चरुपुरोडाश मिक्षाज्यादि साध्यानि कर्माण्यनुतिष्ठतु । त्रिकाण्डमण्डनप्रभृतिभिस्तथाविधानामपि कर्मस्वधिकार इत्युक्तवात् । उक्तं च-

''सूर्यग्रहे कुरुक्षेत्रे मेषीकृष्णाजिनादिकम् ।
चण्डालात्प्रतिगृह्यापि यजेतावश्यकैर्मखैः'' ।। इति

गुणानुरोधेन प्रधानबाधस्यान्याय्यत्वादिति भावः ।

१०. (पशुविशसनाभावेऽपि पिष्टपशुना यागोपपत्ति समर्थनम्)

यानि तु ज्योतिष्टोमादीनि तत्रापि सम्भावितानर्थहेतुहिंसादिविषयान् छागादिपशून् अकृत्वा तत्स्थाने तत्तद्देवताकान् पिष्टपशून् वा घृतपशून् वा विधाय यागं समापयेदेव ।

तदेतत्सर्वं न्यायसिद्धमेवाभिसन्धाय भगवान् मनुर्मांसभक्षण[२५]विधिप्रतिषेधप्रकरणे प्रसङ्गाद्दर्शयति स्म ।

११. (यागे पशुविशसनाभ्युगमेऽपि पिष्टपशुनाऽपि यागोपपत्तौ मनुसम्मतिप्रदर्शनम्)

तथा हि-

'मांसस्यातः प्रवक्ष्यामि विधिं भक्षणवर्जने ।
प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां च काम्यया ।।

(मनुस्मृतिः- ५. २६,२७)

---

२४. दैवादापतिताय इति मुद्रिते । दैवादापतितस्य- श्री
२५. विधिप्रकरण इति मुद्रिते । विधिप्रतिषेध इति- श्री

'प्रोक्षितं भक्षयेत्' इत्यस्य यज्ञे हविश्शेषं भक्षयेदित्यर्थः । श्राद्धे निमन्त्रितोऽपि निमन्त्रयितॄणां ब्राह्मणानां च काम्यया इच्छया स्वयं व्रतवानपि भक्षयेत् । न तेन व्रतक्षतिरिति भावः ।

तदुक्तम्-

'हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ।
अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः' ॥

(म.भा.आश्व. १४.११०) इति ॥

तथा-

'यज्ञाय जग्धिर्मांसस्य ह्येष दैवो विधिः स्मृतः ।
अतोऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते ॥

नाद्यादविधिना मांसं [26]विधिज्ञोऽनः पदि द्विजः ।
जग्ध्वा ह्यविधिना मांसं प्रेत्य तैरद्यतेऽवशः ॥

न तादृशं भवत्येनो मृगहन्तुर्धनार्थिनः ।
यादृशं भवति प्रेत्य वृथा मांसानि खादतः ॥

नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः ।
स प्रेत्य पशुतां याति संभवानेकविंशतिम् ॥[27]

असंस्कृतान् पशून् मन्त्रैर्नाद्याद्विप्रः कथञ्चन ।
मन्त्रैस्तु संस्कृतानद्याच्छाश्वतं विधिमास्थितः' ॥

(मनुस्मृतिः ५, ३१-३५) इति ।

नन्वेवं महान्तं पाक्षिकं प्रत्यवायं पश्यद्भिराधुनिकैर्विषयसङ्गेन असम्पन्नपरिपक्वज्ञानैरत्यवश्यकानि नित्यनैमित्तिककर्माणि कथम् अनुष्ठेयानि इत्यत आह-

---

२६. विधिज्ञोऽनापादि इति पाठः स्यात् ।

२७. अत्र प्रत्यवायः श्राद्धादौ विहिते अभक्षितुः इति ज्ञेयम् ।

'कुर्यात् घृतपशुं सङ्गे कुर्यात् पिष्टपशूंस्तथा ।
न त्वेव तु वृथा हन्तुं पशुमिच्छेत्कदाचन' ॥

(म.स्मृ- ५.३७)इति ।

यद्यप्यत्र विषयादिपदं नोपात्तं तथापि [28]केवलसङ्गशब्दोऽपि योगरूढिभ्यां विषयसङ्ग एव वर्तते । यथा केवलवैराग्यशब्दो विषयवैराग्ये । तथा च प्रयुञ्जते लोकास्तथाविधपुरुषं दृष्ट्वैव अयमतिशयेनासक्तः अयं तु विरक्त इति । ये हि उपनयनदिनात्पश्चमदिन एव विवाहयन्ति कथं न ते विषयसङ्गवन्तः ? कथं च तेषामध्ययनं साङ्गम् ? 'अधीत्य स्नायात्' इति हि श्रूयते । इदमुक्तं भवति- 'न हिंस्यात् सर्वभूतानि' इत्यादिनिषेधवाक्यपर्यालोचनया हिंसाया अधर्मजनने औत्सर्गिकी शक्तिरवगम्यते । सा पुनः 'अग्नीषोमीयं पशुमालभेत' इति वाक्यपर्यालोचनया यागादिकर्मविशेषेऽपोद्यते । यथा दावदहन संस्कारः वेत्रबीजस्य वेत्राङ्कुरजनने सहजशक्तिं प्रातिबध्य कदलीकाण्डजननादितद्विपरीतशक्तिमादधाति, यथा वा विषादेः स्वारसिकीं मारकत्वशक्तिमुपमृद्यभावनादिसंस्कारविशेषस्तद्विपरीतां मृतोज्जीवनशक्तिमादधाति । तथा यागादावपि प्रोक्षणोपाकरणादिसंस्कारविशेषस्तत्रत्यां महानर्थसाधनताशक्तिमुपमृद्य परमपुरुषार्थसाधनताशक्तिमादधाति इति शास्त्रतत्त्वम् । तत्र च विगुणे प्रतिबन्धके कथं सा शक्तिः प्रतिबध्येत । मणिमन्त्रौषधादयो हि यथोक्त लक्षणसम्पन्ना एव वह्न्यादेर्दाहकतशक्तिप्रतिबन्धस्येशते । वर्णमूषादिनापि विगुणे मन्त्रे प्रयुक्ते असञ्जातशक्तिप्रतिबन्धः वह्निर्दहत्येव भुजङ्गो दशत्येव । तस्माद्वह्निभुजङ्गाद्याकलने प्रवृत्तेन तथाविधसंपूर्णसामग्रीमतैव भवितव्यम् । एवमेव लौकिकविषयेष्वासङ्गतः पदे पदे कर्मवैगुण्यस्य संभावितत्वात् सः तादृशयागादौ पशुं हन्तुं कदापि नेच्छेदेव । तथाविधहिंसायाः

---

२८. केवलसशब्दोऽपि ।

वृथात्वात् अनुष्ठितयागफलाजनकत्वादिति । न केवलं वैयर्थ्यमात्रम् अपि तु आत्यन्तिकानर्थहेतुत्वं चेत्याशयेनाह-

'यावान्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथा पशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि' ॥

१२. (अनधिकारिणाऽनुष्ठितयज्ञस्य महानर्थहेतुत्वम्)

'ह-शब्दः 'प्रेत्य खादन्ति ते च तान्' इत्यादिप्रमाणप्रसिद्धिद्योतनार्थः । एतेन युधिष्ठिरादिकृतराजसूयाश्वमेधादियज्ञप्रशंसां 'कुर्वतां प्रेत्य खादन्ति ते च तान्' इत्यादिना कर्मनिन्दां च कुर्वतां साक्षात्परब्रह्मस्वरूपश्रीमद्वेदव्यासमुखारविन्दनिःसृतानां श्रीमद्भागवतादिपुराणवचनानां परस्परविरोधशङ्केवानवकाश दुस्थेति ध्येयम् । उक्तन्यायेन यथाकथञ्चिद् विद्वदविद्वत्कृत कर्मविषयत्वात् । अत एव महाभारते मोक्षधर्मे देवर्षिसंवादे देवशब्दोपलक्षितसंपूर्णाधिकारवतां प्रत्यक्षपशव एव यज्ञेष्वालभ्या ऋषि शब्दोपलक्षितेन तदपेक्षया न्यूनसामग्रीकेनाधिकारिणा पिष्टपशव एवालभ्या इति महता प्रबन्धेन समर्थितम् ।

'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति' ।

इत्याद्यर्थवादाम्नानबलात् रात्रिसत्रे विधिकल्पनमिव प्रकृतेऽपि इतिहासरूपार्थवादस्य विधिकल्पकत्वेनैव प्रामाण्यम् ।

ननु तत्रार्थवादे देवानां मुख्यपश्वालंभनेऽधिकार ऋषीणां तु पिष्टपश्वालंभन इत्युक्तत्वेऽप्युपलक्षणपरतया विद्वदविद्वद्विषयता कल्पनं कस्मादास्थेयम् इति [२९]चेदभ्रान्तोऽसि । तथात्वे इतिहास सर्वार्थवादानाम् अप्रामाण्यमेव स्यात् । तेषां हि क्वचित्सन्निहितविधिस्तावकत्वेन वा क्वचिच्च विध्यसन्निधाने रात्रिसत्रन्यायेन तत्कल्पकत्वेन वा प्रामाण्येन पुरुषार्थपर्यवसायिता ।

इतिहासास्तु सर्वे 'आसीद्दशरथो राजा' इत्यादिव्यक्तिविशेषं

२९. इति चेत् भ्रान्तोऽसि इति पाठः सम्भावितः ।

पुरस्कृत्यैव 'प्रयागादौ सस्नौ' 'ददौ महत्फलमवाप्तवान्' । तथा त्वमपि राजेन्द्र तथा तत्कर्तुमर्हसि' इत्यादयः प्रवर्तन्ते । ते च यद्युपाख्यात संबोध्यमात्रपुरुषाधिकारिकपरा एव स्युस्तथात्वे अस्मदादीनां प्रयागमहात्म्यादिश्रवणमनर्थकतामापद्येतेति यत्किञ्चिदेतत् ।

स्पृष्टतरश्चात्र मनुवाक्ये कुर्यादिति लिङ्प्रत्यय इति न काप्यनुपपत्तिः । ननु [३०]घृतपिष्टादौ पशुत्वाभावात् कथं तत्र पशुशब्दप्रयोगः 'कथं वा तदनुष्ठानेन पशुमालभेत' इति शास्त्रार्थसिद्धिः स्यादिति चेन्नैवम् । 'तमेतमभिषिञ्चनीये पुरुषं पशुमालभेत' इत्यादौ पुरुषे साक्षान्मन्त्रद्रष्टरि शुनःशेपेऽपि पशुशब्दप्रयोगात् ।

न हि तथाविधे गौण्यापि पशुशब्दो युक्तः । न च तथाऽपि यज्ञसाधनीभूतप्राणिद्रव्यत्वं तत्राप्यस्त्येवेत्युपपद्यते कथञ्चित्तत्र प्रयोगो, न तु घृतपिष्टादिवदिति वाच्यम् । मेषत्वमेषीत्वादिजात्यभाववत्यपि चातुर्मास्ये पिष्टप्रतिकृतौ 'मेषमध्वर्युः करोति' 'मेषीं प्रतिप्रस्थाता'[३१] इत्यादौ मेषमेषीशब्दयोः प्रयोगस्य लोकवेद सम्मतत्वात् । यदि च तत्र संस्थानविशेषमादाय तथाविधप्रयोगः सममेतत्प्रकृतेऽपि । पिष्टादिनापि छागाद्याकारस्य निर्मातुं शक्यत्वात् । घृतस्यापि घनीभूतस्य पश्वाकृतिसंपादकत्वं युज्यते एव । यदि च वस्त्रादिना पशुप्रमाणं पश्वाकृतिसमानाकारं पेशीविशेषं निर्माय तत्र घनीभूतं घृतमापूर्य शीतलतरजलपरिपूर्णकटाहादिपात्रविशेषे स्थाप्येत । यदि वा सपेशी विनिर्मुक्त एव स्थाप्येत तदा कथं न संभवेत् घृतपशुः । घृतस्य प्राणिभवद्रव्यत्वसामान्यात् हृदयादिभिरत्यन्तसारूप्यलाभात् । न हि पशुः साक्षाद्धविः किन्तु व्रीह्यादिवत्प्रदेयप्रकृतिभूत इति खलु सिद्धान्तः । हविष्ट्वं तु हृदयाद्यवयवानामेव । न च हृदयादिषु प्राणित्वमस्ति । किन्तु 'प्राणिभवत्वमेव । तच्च

३०. कृतपिष्टादौ- मुद्रिते

३१. चातुर्मास्ये वरुणप्रघासे 'अत्र मेषप्रतिकृती व्यतिहरतः' इत्यादिना एतत् दृश्यते आपस्तम्बश्रौतसूत्रे । ८.६.१६, ८.५.४३.

घृतेप्यविशिष्टम्' इत्यभिप्रेत्य क्लेशसाध्यमपि घृतपशुं प्रथमकल्पत्वेनो पदिष्टवान् । 'कुर्यात् धृतपशुं सङ्ग' इति ।।

१३. (पिष्टपशुनाऽपि होम्यविध्युपपादनम्)

ननु कथं 'हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस' इत्यादिशा स्त्रानुष्ठानं ? न हि तत्र हृदयजिह्वाद्यवयवविशेषोऽवगन्तुं शक्यत इति चेन्न । प्रकृतिविशेषनिर्माणप्रवीणैस्तत्तदङ्गेषु तथाविध जिह्वादिकमपि हि निर्मातुं शक्यम् । न च तथापि 'व्रीहियवमतीरपः पाययेत्' इत्यादिना आम्नातस्य पानादेरशक्यानुष्ठानत्वमेवेति चेत् सत्यम् । चातुर्मास्ये मेषस्य मेष्याश्च पिष्टमयोरपि शमीपर्णकरीराद्यावापवदुप पत्तेः ।

१४. (श्रुतेः प्रबलत्वात् पशुविशसनविधेस्तत्कर्तव्यत्वशङ्का)

स्यादेतत् 'अग्नीषोमीयं पशुमालभेत' इति प्रत्यक्षश्रुत्या आम्नातस्य पशुत्वजात्याक्रान्तस्य स्मृतिबलात्कथमधिकारिविशेषे व्यवस्थापनं युक्तम् । सिद्धे त्वस्मिन्मूले तद्बलात्सर्वापि कल्पना सुवचा । तदेव तु न संभवति । स्मृतेः श्रुत्यपेक्षया दुर्बलत्वात् । तदनुरोधेन श्रुतिसङ्कोच स्याऽन्याय्यत्वात् । अन्यथा 'औदुंबरीं स्पृष्ट्वोद्गायति' इति श्रुतेः सर्वा वा औदुम्बरी वेष्टयितव्या' इति सर्ववेष्टनस्मृत्या सङ्कोचापत्त्या **'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्'** (जै.सू. अ.२, पा.१, सू.३) इति स्मृतिचरणे जैमिनीयं न्यायव्युत्पादनम सङ्गतमापद्येतेति ।

१५. (स्मृत्यनुरोधेन श्रुतिव्याख्यानकर्तव्यतासमर्थनम्)

अत्रोच्यते । स्मृतीनां श्रुतितात्पर्यनिर्णयार्थमेव प्रवृत्तत्वेन तद्बलात्तद र्थाध्यवसायस्यावश्यकत्वात् । तदुक्तमत्रैव मनुना-

'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रचरिष्यति ।।

(म.भा- १.१.२९३) इति ।

अत एवोत्तरमीमांसायां वेदार्थनिर्णयाय प्रवृत्तः सर्वज्ञचूडामणिः बादरायणोऽपि भगवान् बहुशः 'स्मृतेश्च'(४.३.११) इत्यादिसूत्रैः स्वोक्तार्थे स्मृतिं सम्मतित्वेनोदाजहार । ननु पौरुषेयवाक्यबलादपौ रुषेयस्य बाधनीयतेति चेत् भ्रान्तोऽसि । न हि वयं पश्वालम्भनवाक्यं बाधितमिति वदामः । किन्तु, युगविशेषपरं वा पुरुषविशेषपरं वा इत्येतावत् ।।

अत एवोक्तं तत्रैव मनुना-

'चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे ।
नाधर्मेणाऽऽगमः कश्चिन्मनुष्यान् प्रतिवर्तते ।।

इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः ।
चौरिकानृतमायाभिर्धर्मश्चापैति पादशः ।।

अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः ।।

वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम् ।
फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम् ।।

अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे ।
अन्ये कलियुगे धर्मा युगह्रासानुरूपतः' ।। इति ।

(म.स्मृ-१.७५-८१)

अन्यथा पौरुषेयग्रन्थव्याख्यानानि भाष्यादीन्यपि व्यर्थानि प्रसज्येरन् । किं बहुना तदर्थनिर्णायकन्यायग्रथनात्मकं पूर्वोत्तरमीमांसा द्वयम प्यसङ्गतमापद्येत । तस्यापि पौरुषेयत्वेन श्रुत्यर्थव्यवस्थाप कत्वानुपपत्तेः । यदि च मीमांसायाः न्यायशास्त्रत्वाद्युक्त्युपेतार्थनिण र्यिकता संभवति तर्हि वेदसमकक्षस्य न्यायोपबृंहितस्य (पुराणादेः) सुतरामुपपन्नं व्यवस्थापकत्वम् । साक्षात्पशुवधे पाक्षिकपरमानर्थोप

त्तिरूपबाधकन्यायस्योक्तत्वात्[३२] । 'कुर्यात् पिष्टपशुम्' इत्यादेरपि साक्षाच्चतुराननात्मजेन सकलवेदद्रष्ट्रा मनुना प्रणीतत्वेन वेदमूलत्वस्याऽऽवश्यकतया उदितानुदितहोमविधायकवाक्यवद् व्यवस्थया प्रामाण्योपपत्तेः ।

तदुक्तम्-

'स्वायंभुवो मनुर्धीमान् इदं शास्त्रमकल्पयत् ।
विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः ।।

शिष्येभ्यश्च प्रवक्तव्यं सम्यङ् नाऽन्येन केनचित् ।
इदं शास्त्रमधीयानो ब्राह्मणः शंसितव्रतः ।

मनोवाग्देहजैर्नित्यं कर्मदोषैर्न लिप्यते ।
पुनाति पङ्क्तीर्वंश्यांश्च सप्त सप्त [३३]परात्रारान् ।।

पृथिवीमपि चैवेमां कृत्स्नामेकोऽपि सोऽर्हति ।
इदं स्वस्त्ययनं श्रेष्ठमिदं बुद्धिविवर्धनम् ।।

अस्मिन् धर्मोऽखिलेनोक्तो गुणदोषौ च कर्मणाम् ।
चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः' ।।

(म.स्मृ- १. १०२-१०७) इति ।

१६. (गौडमीमांसकमतनिरसनम्)

एतेन सङ्ग आसक्तौ पशुमांसभक्षणाद्यनुरागे सति पिष्टमयीं वा घृतमयीं वा पशुप्रतिकृतिं कृत्वा खादेदिति केषाञ्चिद् गौडमीमांसकानां [३४]व्याख्यानान्यपहसितानि बोद्धव्यानि । अत्यन्तासंबद्धार्थकत्वात् । नहि पशुमांसभक्षणे लोलचित्तः पिष्टपशुना तां तृप्तिमवाप्नोति । यो

---

३२. **मोक्षधर्मेतिहासस्य जैमिनिगुरुणा बादरायणेन प्रणीतत्वात् । इत्यधिकं श्रीकोशे**

३३. **परावरान् इति पाठः स्यात् ।**

३४. **व्याख्यानान्यपहसनीयानि इति मुद्रिते**

हि नास्तिको निर्दयतरः केवलक्रव्यादरूपः स एवैवं कामयेन्नाम यत्परमांसेन स्वमांसपोषणम् । स कथं सहस्रशोऽपि विहितेन घृतपशुना वा पिष्टपशुना वा शाम्यतु । न च मांसभावनया जग्धस्य तत्कार्यकारित्वम् । अमृतबुद्ध्या पीतस्य हालाहलस्यापि मरणहेतुत्वानापत्तेः इत्यलम् अपहसनीयव्याक्रियानिराक्रिया विस्तरेणेति ।

१७. (पशुकार्यं पिष्टपशुः कुर्यादेव)

ननु कथं भवद्व्याख्यानपक्षेऽपि पशुकार्यं पिष्टपशुः कुर्यादिति चेत् न । यत्र ह्यदृष्टद्वारा फलेन सह कार्यकारणभावस्तत्र च विधिबोधितत्वादेव तादृशादृष्टजनकतामातिष्ठामहे । अलौकिकार्थे सामान्यतो दृष्टस्य अप्रयोजकत्वात् । श्रूयते हि यूपप्ररोहप्रायश्चित्ते पशुपुरोडाशपूर्णाहुतिस्रुवाहुतीनां विकल्पः । न हि तत्र [३५]कुतर्कः साधनस्य बाधनस्य चेष्टे ।

तदुक्तम्-

'पुराणं मानवो धर्मः साङ्गोपाङ्गचिकित्सकः ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः' ।।

(म.स्मृ-२१.११० अधिकपाठः)

किञ्च-

श्रुतिस्तु वेदो विज्ञेयो धर्म शास्त्रं तु वै स्मृतिः ।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ ।।

योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः ।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ।।

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्' ।।

(म.स्मृ- २.१०-१२)इति ।

---

३५. **कुतर्कैः इति मुद्रिते । कुतर्कः- श्री**

यद्यप्यत्रोक्तं [३६]स्मृतिचरणोक्तन्यायविरोध इति तदप्यसङ्गतमेव । तथा हि न तावत् स्मृतित्वमेव सर्ववेष्टनस्मृतावप्रामाण्ये प्रयोजकं किन्तु लोभमूलकत्वादिकमेवति शबरस्वामिप्रभृतयो वर्णयन्ति । न चासौ प्रकृते हेतुः संभवति । [३७]'वैसर्जनीयं वासोऽध्वर्युर्गृह्णाति'(?) 'यूपहस्तिनो दानमाचरन्ति' इत्यादौ कथञ्चिल्लोभमूलकतायाः संभवदुक्तिकत्वेऽपि सर्ववेष्टनस्मृतिकर्तुर्व्यङ्गुलमात्रवस्त्रलोभ इति मीमांसकम्मन्यः कथं कल्पयितुं न जिह्लाय? । अन्यथा सुवर्णसूत्र निर्मितवस्त्रेण वेष्टयितव्येत्यवक्ष्यत् । वस्तुतस्तु तदप्यसम्बद्धमेव । अध्वर्युणा वाससि गृहीते स्मृतिकर्तुः कथं लोभः सिद्धः । यद् व्यङ्गुलमात्रवस्त्राशया कर्मवैगुण्यसम्पादिकां स्मृतिं प्रणिनाय । अस्तु तत्र यथाकथञ्चित्किमेतया नः कुचर्चया । घृतपिष्टपशुविधातुः स्मृतिकर्तुस्तु नायं लोभकलङ्कोऽपि । प्रत्युत यः साक्षादेव मुख्यः पशुरित्यागृण्हाति स एव स्वीयं जिह्वालौल्यं परमांसगृध्नुतां वाऽऽविष्करोतीत्यलम् । नापि भ्रमप्रमादविप्रलम्भमूलकता सम्भवदुक्तिका । 'यज्ञार्थं पशवः सृष्टाः' इत्युत्तरवाक्यस्य 'तस्माद् यज्ञे वधोऽवधः' इति पूर्ववाक्यस्य च प्रणयनेन विशेषदर्शनानुमानात् । विप्रलम्भकत्वशङ्का तु निर्बीजैव । अन्यथा वेदस्यापौरुषेयत्वेऽप्यध्यापकैर्विप्रलम्भकैः कैश्चिदन्यथा पाठितः किं न स्यादित्यादि शङ्कापिशाचीभिः सर्वत्राऽनाश्वास एवापद्येतेति दिक् ।

परमार्थतस्त्वेतत्सर्वं भाष्यकर्तुरेव पाण्डित्यम् । यद्वैदिकस्मृतीनाम प्रामाण्यकल्पनमभ्युपेत्य चेदं (कल्प्यते इति वयं) वदामः । आस्तां श्रुतिविरोधेन स्मृतीनामप्रामाण्यम् । तन्मानवातिरिक्तविषयकमेव ।

मानवस्मृतेः साक्षाद्वेदेनैव 'यद्वै किञ्चन मनुरवदत् तद्भेषजम्' । (तै.सं- २,२,१०)

इति साक्षादेव प्रमाणत्वेनोपादानात् । एवं च जैमिनिस्मृतेरेवास्मिन्नंशे श्रुत्या बाधितत्वेनाप्रामाण्यम् । स्मृत्यन्तरे सावकाशत्वाच्च । नात्यन्त

[३६]. समृतिचरण इति मुद्रिते

[३७]. वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति इति पाठः स्यात् ।

बाधोऽपि । यत्तु नित्यानित्यसंयोगविरोधेन वेदाप्रामाण्यापत्त्या बबरः प्रावाहणिरित्यादाविव[३८] नैतादृशस्थले मन्वादिशब्देन एते मन्वादय इति तान्त्रिकम्मन्यानां पाण्डित्यम् । [३९]तत्तु 'व्रीहिभिर्यजेत' इत्याद वप्यलौकिक[४०]व्रीहीन्नूनं कल्पयिष्यति जातेः शास्त्रार्थत्वे प्रकृतेऽपि तुल्यत्वात् । तस्य ग्रन्थनिर्माणेऽसामर्थ्यान्नेति चेत् व्रीहित्वादेरपि पुरोडाशनिर्मातृत्वाभावात् समम् । व्यक्तिद्वारा चेदत्रापि । किञ्च राजसूयाश्वमेधानुष्ठातृणामिदानीमभावात् हरिश्चन्द्रयुधिष्ठिरादीनां च श्रुत्यादिसमधिगम्यत्वेन मनुबबरादि पङ्क्तिनिविष्टत्वात् कथं तत्कर्मबोधकवेदस्य प्रामाण्यमिति स एव प्रष्टव्यः । अपि वा नैमित्तिकप्रायश्चित्तादिविधीनां कथं प्रामाण्यं तस्य सार्वादिकत्वे(?) निमित्तताव्याघातादित्यलम् ।

स्मृतिश्चाऽत्र मानम्-

'यः कश्चित्कस्यचिद्धर्मो मनुना संप्रकीर्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥

सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा ।
श्रुतिप्रामाण्यतो विद्वान् स्वधर्मे निविशेत वै' ॥

(म.स्मृ- २, ७-८) इति ।

न चोदाहृतश्रुतिस्मृत्योः पिष्टपश्वतिरिक्तांशे प्रामाण्यप्रतिपादकत्वेन उपपत्तिरिति वाच्यम् । उभयत्र 'यत्किञ्च' इति सर्वनामभ्यां विशिष्य तत्पदार्थप्रामाण्यस्योक्तत्वात् । अन्यथा-

'यत्किञ्चित्प्राचीनमग्नीषोमीयात् तेनोपांशु चरन्ति ।
यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयात्' ॥

[३८]. बबरः प्रावाहणिरकामयत इति अनित्यसंयोगे दृष्टान्त उपात्तः वेदनित्यत्वाधिकरणे पूर्वमीमांसायाम् ।

[३९]. ननु इति मुद्रिते

[४०]. व्रीहिभूतं इति मुद्रिते

इत्यादौ सावकाशनिरवकाशभावेन बाध्यबाधकभाव इति वैषम्यं न स्यात् । स्मृत्यन्तराद्विशेषानुपपादनाच्च । न ह्येतादृशस्मृतेरनर्थकत्व मुररीकृत्य अत्यन्तबाधः समुचितः । कुल्लूकादिव्याख्यानानां निरस्तत्वात् । श्रुतेस्त्वधिकारिविशेषपरतायाः उक्तत्वेनोभय प्रामाण्येऽपि क्षत्यभावात् ।

ननु यद्यत्र मांसभक्षणेऽत्यन्तासक्तौ सत्यां पिष्टघृतपशून् कृत्वा खादेदिति विधिपरत्वेन व्याचक्षीमहि तदैवोपन्यस्तदोषैरुपालभ्येमहि । न चैवं ब्रूमः । आसक्तौ भक्षणस्य रागतः प्राप्तत्वात् । किन्तु एवं कृत्वाऽपि खादेत् न तु वृथा विधिं विना पशून् हन्यादिति तात्पर्यार्थम् इति चेन्मैवम् । निरस्त प्रायत्वात् । न हि प्रत्यक्षमांसभक्षणासक्तस्य पिष्टपशुभक्षणं रागप्राप्तं येनैवमुक्तिः सङ्गच्छेत । किन्तु कुर्यादित्युभयत्र विधिप्रत्ययद्वयभङ्गः किं बलादास्थीयते । न ह्यत्र 'यदभिधारयेत् रुद्रायास्ये पशूनिदध्यात्' इतिवद्विधिशक्तिप्रतिबन्धकं यच्छब्दाद्युप बन्धं पश्यामः । प्रकरणबलादेवमास्थीयत इति चेत् । साधु समर्थिता मीमांसा प्रकरण बलाच्च श्रुतिमन्यथयता लोकोत्तरप्रज्ञेन । अप्रवृत्तप्रवर्तनार्था हि लिङ्श्रुतिः कथमविवक्षितार्थेति वक्तुमुचितम् । आख्यातत्रयोपेतत्वात् एकवाक्यता तु नास्त्येव येन वाक्यभङ्गभियापि कुसृष्टिरास्थीयते ।

१८. (प्रतिनिधिविधानस्यावश्यकत्वसमर्थनम्)

न च गत्यन्तराभावादेवं व्याचक्ष्महे इति साम्प्रतम् । प्रकारान्तरेणैव राजमार्गस्य पूर्वमेव प्रदर्शितत्वात् । मांसभक्षणविधिनिषेधप्रस्तावे यागी यपशोः कः प्रसङ्ग इति चेत् । तत्प्रस्तावेनैव विगुणाधिकारिक र्तृकयागानाम नारम्भापत्त्या नित्यकर्मसु पाक्षिकानर्थसम्भावनाशून्य पशुप्रतिनिधिविधान स्यावश्यकताया उक्तत्वात् । ग्रन्थस्वारस्येनैव एतादृशार्थस्य सुधियां पुरःस्फूर्तिकत्वाच्च । त्वत्पक्षे तु केवलमसङ्गता नुवादेन संपूर्णस्य विधिद्वयोपेतस्य पूर्वार्धस्याजागलस्तनाय मानतापत्तिरेव ।स्वरसभङ्गेनापि प्रकरणानुरोधे तु दर्शपूर्णमासप्रकरणतः पूषानुमन्त्रणमपि नोत्क्रष्टव्यं स्यात् । तथा च कथञ्चित्पोषणादिगुण

युक्तसमवेतदेवताप्रकाशकत्वेन प्रकृतावेवोपयोगस्योपपादयितुं शक्यत्वेन तार्तीयकन्यायस्य जलाञ्जलि प्रदानमवशिष्येत । तस्मादुक्त एवार्थः साधीयान् ।

यद्वा सज्यते बध्यते पुरुषोऽनेनेति सङ्गो नित्यनैमित्तिक कर्मविधिस्तत्रेत्यर्थः ।

'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते' इत्यादि श्रुतौ नित्यनैमि त्तिककर्मणां ऋणत्वेनाभिधानात् । तथा च न कोऽपि शङ्काशूकः । भारतेतिहासरूपार्थवादानुमितविधेराधिकारिविशेषपरता याः उक्तन्यायेना वश्यकतायाः प्रदर्शितत्वाच्चेति दिक् ।

तदेत्सर्वं शबरस्वामिभाष्यमभ्युपेत्य समाहितम् । परमार्थतस्तु नायं भगवतो जैमिनेः सूत्रकारस्याशयः यत्स्मृतीनां परमवैदिक शिरोमणिभिः साक्षान्मन्त्रद्रष्टृभिः प्रणीतानामप्रामाण्यमिति । यस्मात्

'श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु [४१]वै स्मृतिः ।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ ॥

योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः ।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः' ॥

(म.स्मृ- २.११.)

इति पूर्वोदाहृतमानववाक्येषु महान् प्रत्यवायः श्रूयते । तदेतत्सर्वम नुसन्धाय भट्टाचार्यैरन्यथैवेदमधिकरणमारचय्य शाक्यादिस्मृतय एवोदाहरणमिति प्रतिज्ञाय शाबरभाष्यं प्रत्यक्षेपि, सपरिकरं च स्वप्रतिज्ञातार्थः प्रत्यपादि ।

उक्तं चैतत्तन्त्रवार्तिके-(१.३.३)

'श्रुतीनां स्मृतिमूलत्वे दृढे पूर्वं निरूपिते ।
विरोधे सत्यपि ज्ञातुं शक्यं मूलान्तरं कथम् ॥

---

४१. न वै इति मुद्रिते

वेदो हीदृश एवायं पुरुषैर्यः प्रकाश्यते ।
स पठद्भिः प्रकाश्येत स्मरद्भिर्वेति तुल्यभाक् ॥

अनुच्चारणकाले च संस्कारैरेव केवलैः ।
तत्कृतस्मरणैर्वायं वेदोऽध्येतृषु तिष्ठति ॥

तेनार्थं कथयद्भिर्या स्मृतार्था कथ्यते श्रुतिः ।
पठिताभिः समानासौ केन न्यायेन बाध्यते ॥

स्मृतिशास्त्रं च यद्येकं भवेत्कृत्स्नमवैदिकम् ।
तन्मुक्त्वैकं? ततोऽन्यानि व्यवहाराङ्गतामियुः ॥

कठमैत्रायणीयादिपठितश्रुतिमूलकाः ।
दृश्यन्ते स्मृतयः सर्वा यद्वोपनयनादिषु ॥

तदा तन्मध्यपात्येकं वाक्यं किञ्चिदपस्मृतिः ।
मूलान्तरोद्भवं वक्तुं जिह्वा नो नः प्रवर्तते ॥

बाधितार्थस्मृतिर्भूत्वा काचिन्न्यायविदा यदा ।
श्रूयते न चिरादेव शाखान्तरगता श्रुतिः ॥
तदा का ते मुखच्छाया स्यान्नैयायिकमानिनः' ॥

तथा-

लोभमूलं च यत्तस्याः कल्प्यते सर्ववेष्टनम् ।
तल्लोभः सुतरां सिद्ध्येन्मूलाग्रपरिधानयोः ।

अधरीयोत्तरीये हि योषितामिव वाससी ।
स्मरेत्कौशीयजातीये नौद्गातैकं गुणैर्विना ॥

इत्यादिना भाष्यं सोल्लुण्ठमुन्मृद्य शाक्यादिस्मृतीनामेव श्रुतिविरोधादप्रामाण्यमिति स्थापितमिति सङ्क्षेपः । तदेतत्सर्वं निर्मत्सरैरेव सहृदयैर्भगवद्भक्तैराकलनीयम् । 'तेषामेवेदं हृदयङ्गममस्तु' इत्यखिलमतिमङ्गलम् ॥

'सर्वयज्ञेश्वरोऽनेन सर्वयज्ञफलप्रदः ।
सर्वयज्ञैकभुग्विष्णुः प्रीयतां पुरुषोत्तमः' ॥

इति श्रीमद्विद्वन्मुकुटरत्नश्रीविश्वनाथसूरि-
नारायणपण्डितोन्नीता पिष्टपशुमीमांसा समाप्ता ॥

***

।। श्रीलक्ष्मीनरसिंहाय नमः ।।

।। २ ।। अथ श्रीमत्सत्यविजयतीर्थविनेयेन

वरखेडि तिम्मणाचार्येण कृता लघुपुरोडाशमीमांसा ।।

कृष्णं रमापतिं नत्वा सत्यजैत्रं जगद्गुरुम् ।
साधयिष्ये पशुस्थाने पुरोडाशं कलौ युगे ।। १ ।।

१९. (प्रतिनिधि (पुरोडाश)ग्रहणे मुख्यनिषेधोपपादनम्)

ननु कथं पशुस्थाने पुरोडाशः । मुख्याभावे हि प्रतिनिधिग्रहणम् । सत्यं । मुख्यस्य निषेधात् । तथा हि ऋग्वेदब्राह्मणे द्वितीयपञ्चिकायाम्-

'पुरुषं वै देवाः पशुमालभन्त । तस्मादालब्धान्मेध उदक्रामत् । सोऽश्वमाविशत् । तस्मादश्वो मेध्योऽभवत् । अथैनमुत्क्रान्तमेधमत्यार्जन्त । स किंपुरुषोऽभवत्' ।। इति । (ऐ०ब्रा० ६.८)

(सा० भा०) 'पुरा कदाचिद्देवाः स्वकीये यज्ञे पुरुषं मनुष्यं पशुमालभन्त, पशुं कृत्वा तेन पशुना यष्टुमुद्युक्ताः । तस्मादालब्धाद्यष्टुमुद्युक्तान् मनुष्यपशोर्मेधो मेध्यो यज्ञयोग्यो हविर्भाग उदक्रामन्मनुष्यं परित्यज्याऽन्यत्रागच्छत् । गत्वा च स भागोऽश्वं प्राविशत् । यस्मादेवं तस्मादश्वो यज्ञयोग्योऽभवत् । अथ तदानीमुत्क्रान्तमेधं परित्यक्तहविर्भागमेनं मनुष्यं देवा अत्यार्जन्तातिशयेन वर्जितवन्तस्तस्मिन् पशुत्वमपि नाकुर्वन् । देवैः स्वीकृत्य परित्यक्तः स मनुष्यः किंपुरुषः तन्नाम किन्नरा वान्तरजातिरभवत् ।।

अथ द्वितीयं पर्यायं दर्शयति-

'तेऽश्वमालभन्त । सोऽश्वादालब्धादुदक्रामत् । स गां प्राविशत् । तस्माद्गौर्मेध्योऽभवत् । अथैनमुत्क्रान्तमेधमत्यार्जन्त । स गौरमृगोऽभवत्' । (ऐ.ब्राह्मण- ६.८) इति

आलब्धादश्वात्समेधो यज्ञयोग्यो गां प्राविशत् । गोजातियुक्तोऽभवत् । तदानीमयोग्यत्वेन परित्यक्त अश्वः गौरमृगोऽभवत् ।

तृतीयपर्यायं दर्शयति-

'ते गामालभन्त । स गोरालब्धादुदक्रामत् । सोऽविं प्राविशत् । तस्मादविर्मेध्योऽभवत् । तथैनमुत्क्रान्तमेधमत्यार्जन्त । स गवयोऽभवत्' । इति ।

अविजातिः प्रसिद्धा । गवयो गोसदृशो मृगविशेषः ।

चतुर्थपर्यायं दर्शयति-

'तेऽविमालभन्त । सोऽवेरालब्धादुदक्रामत् । सोऽजं प्राविशत् । तस्मादजो मेध्योऽभवत् । अथैनमुत्क्रान्तमेधमत्यार्जन्त । स उष्ट्रोऽभवत् ।

अजजातिः प्रसिद्धा । उष्ट्रो दीर्घग्रीवः ।

अजं पुनरपि प्रशंसन्ति- **'सोऽजे ज्योक्तमामिवारमत । तस्मादेष एतेषां पशूनां प्रयुक्ततमो यदजः'** । इति ।

स मेधाख्यो यज्ञयोग्यो भागस्तस्मिन्नजे ज्योक्तमामिव अतिशयेन चिरकालमेवारमत क्रीडितवान् । तस्माच्चिरकालमेव सद्भावात् स अज एतेषां पूर्वोक्तानां मध्ये प्रयुक्ततमः शिष्टैरतिशयेन प्रयुक्तः ।

पञ्चमपर्यायं दर्शयति- **'तेऽजमालभन्त सोऽजादालब्धादुदक्रामत् । स इमां प्राविशत् । तस्मादियं मेध्याऽभवत् । अथैनमुत्क्रान्तमेघमत्यार्जन्त । स शरभोऽभवत्'** । इति ।

इमां पृथ्वीम् । देवैः स्वीकृत्य त्यक्तः स अजः स शरभः अष्टभिः पादैरुपेतः सिंहघाती मृगविशेषः।

प्रासङ्गिकतयोक्तस्य फलं दर्शयति- **'त एत उत्क्रान्तमेधा अमेध्याः पशवः । तस्मादेतेषां नाश्नीयात्'**[४२]। इति ।

---

४२. एतेषां मांसं नाश्नीयादिति समुदितार्थः

२०. (पिष्टपशुना यागकरणे प्रमाणप्रदर्शनम्)

मनुष्याश्वगोऽव्यजेभ्यो मेधस्योत्क्रमणात् यज्ञयोग्याः पशवो नासन् । तत एव तेषां पशूनां सम्बन्धि मांसादिकं नाश्नीयात् ।

अत्र कश्चित् 'नाश्नीयात्' इत्यनशननिषेध एव न यज्ञनिषेध इति । तन्न । 'अमेध्या' इत्यनेनैव यज्ञनिषेधात् अमेध्यपशुना यज्ञानुष्ठाने यज्ञव्याजेन भक्षणार्थमेवायं प्रयत्न इति ज्ञापनाय भक्षणनिषेधः । अतः अनुष्ठानलोपः स्यादित्यतस्तत्प्रतिनिधिभूतं पुरोडाशं विधत्ते-

'तमस्यामन्वगच्छन् । सोऽनुगतो व्रीहिरभवत् ।
तद्यत्पशौ पुरोळाशमनुनिर्वपन्ति समेधेन
नः पशुनेष्टमसत्केवलेन नः पशुनेष्टमसत्'[४३]

(ऐ.ब्राह्मण- ६.८)इति' । इति ।

तं मेधाख्यं हविर्भागम् अस्यां पृथिव्यां प्रविष्टं ग्रहीतुं देवा अन्वगच्छन् । स च मेधो देवैरनुगत उत्क्रान्तुमशक्तः सन् सहसा व्रीहिरभवत् । तथा सति यस्मादमेध्याः पशवस्तस्मान्निषिद्धे पशौ सति पुरोडाशमनुनिर्वपन्ति पशुस्थाने पश्वाकारम् अनुस्मृत्य पुराडाशमनुनिर्वपेयुः । तदानीं नो अस्माकं समेधेन यज्ञयोग्य हविर्भागैर्युक्तेन पशुना इष्टमसत् इष्टमस्तु । पुरोडाशनिर्वापकर्तॄणां कोऽभिप्राय इति सोऽभिधीयते । नोऽस्माकं केवलेन साधनान्तर निरपेक्षेण मेधोपेततया सम्पूर्णेन पशुना इष्टमस्त्विति । अत्र तात्पर्यज्ञापनाय तद्वेदनं प्रशंसति-

'समेधेन हास्य पशुनेष्टं भवति केवलेन हास्य पशुनेष्टं भवति य एवं वेद' ।।(ऐ.ब्राह्मण- ६.८) इति ।

४३. मेधस्य व्रीहियवरूपत्वात् पुरोळाशविनियोगेन यज्ञः पूर्ण इत्यर्थः । विवृतोऽयमर्थः ऐतरेयब्राह्मणसुखप्रदायाम्- 'नरादिशरभान्तेभ्यो मेधा उत्क्रम्य वै स्थिताः । सन्तो व्रीहियवावास्तां पुरोळाशस्तु तन्मयः' इति

तथा च सयुक्तिकपशुनिषेधेन तत्स्थाने पशुपुरोडाशस्य विधानात्प्रतिनिधित्वं तस्य स्पष्टं प्रतीयते।

न च पशोः सर्वथा निषेधे बहुशाखाविरोधः पूर्वोक्तविरोधश्च तत्र सर्वत्र पशोर्विधानादिति वाच्यम् । नात्र सर्वथा पशोर्निषेधः किन्तु प्रसङ्गात् 'पुरुषं वै देवा' इत्यादिना कालविशेष एव सर्वपशूनां अमेध्यत्वयुक्त्या प्रतिषेधः क्रियते । अत एव तयैव युक्त्या सर्वेऽपि विरोधाः परिहृताः ।

तत्र **''पशुमालभ्य पुरोडाशं निर्वपति समेधमेवैतमा लभते........ तस्य शिरः छित्वा मेधं प्राख्षारयन्त्स प्रख्षोऽभवत्''** । (कृष्णयजु- ६.३.१०.२-३)

इत्यादिना शाखान्तरे समेधस्यैवाङ्गीकारात् अत्र मेधस्य निषेधात्कथं न विरोधः ?

ननु 'इदानीममेध्याः पशव' इत्यत्र प्रमाणाभावात् कालान्तर विषयत्वं निषेधस्यानङ्गीकृत्य पश्वनुष्ठानं किं न स्यात् इति चेत् । सत्यं । 'ब्राह्मणो न हन्तव्यः । न हिंस्यात्सर्वभूतानि' इत्यादावपि 'कलिकाल' इत्यत्र प्रमाणाभावेनायं निषेधः कालान्तरे न कलिकाल इति स्यात् ।

न च निषेधस्य विहितेतरविषयत्वात् यागीयहिंसायाः विधानान्न दोष इति वाच्यम् । यागीयहिंसायाः एवात्र अमेध्यत्वयुक्त्या प्रतिषेधात् । तथाचामेध्यत्वानिर्णये कथं सन्दिग्धविषये हिंसादौ भवतां प्रवृत्तिः। अनुष्ठातॄणां भगवतामेव कालनिर्णयस्यावश्यकत्वात् 'अन्यथा न हिंस्यात्' इति निषेधस्यापि कलिकालविषयत्वे निर्णायकाभावेन व्यर्थहिंसायामपि प्रवृत्तिप्रसङ्गात् ।

नन्वमेध्यत्वयुक्त्या प्रतिषेधः न सर्वपशूनां किन्तु किन्तु पुरुषगौरमृग गवयउष्ट्रशरभानाम् । तेषां अत्र खण्डे प्रकृतत्वात् । तथैव विद्यारण्यभाष्ये व्याख्यानात् इति चेन्न । तथा सति

पुरुषगवाश्वादीनां निषेधाभावेन 'ब्रह्मणे ब्राह्मणमालभेत' इत्यादि विधानाच्च इदानीं ब्राह्मणाद्यालम्भनं स्यात् । किंपुरुषादिपरत्वे निषेधस्य 'त एत उत्क्रान्तमेधा अमेध्याः पशव' इति वाक्यस्य वैयर्थ्यापत्तेः । किं पुरुषादीनां यागे प्रसक्त्यभावात् । अथैनमुत्क्रान्त मेधमत्यार्जन्त स किंपुरुषोऽभवत् इति देवैः उत्क्रान्तमेधत्वादिना परित्यागानन्तरमेव किम्पुरुषादीनामुत्पत्तिः तेषां यागे अत्यन्तायोग्य त्वेनाप्रसक्त्या निषेधानुपपत्तिः । तथा च निषेधवाक्यवैयर्थ्यं दुर्वारम् । त एते इति पदद्वयं च व्यर्थम् । अस्मत्पक्षे तु ते पुरुषादय एते किंपुरुषादय इति उभयग्रहणेन यथा पुरुषादयो देवैस्त्यक्तास्तथा सर्वे पशवः अन्यैस्त्याज्या इति दृष्टान्तदार्ष्टान्तिकाभावेन उभयनिषेधार्थप दद्वयसंभवात् । किञ्च पुरुषपशोः सकाशान्मेधो अश्वं प्रति गत इत्युक्तम् । तत्र किमेकस्मात्पुरुषादुत सर्वेभ्यो वा । नाद्यः । एकं पुरुषं परित्यज्यान्येन पुरुषेण यागस्य कर्तुं शक्यत्वात् देवैः 'तेऽश्वमालभन्त' इत्यादि पर्यायचतुष्टयं निषेधादिश्च व्यर्थः स्यात् । द्वितीये तु सर्वे अमेध्याः सर्वेऽपि निषेध्या एव । एवं पर्यायचतुष्टयेऽपि।

ननु न एत इति निषेधः । किं तु पशुपुरोडाशस्यार्थवादः । न हि निन्दान्यायेन । मैवम् । सयुक्तिकानिषेधस्याप्यर्थवादत्वेन 'परदारान्न गच्छेत्' 'न हिंस्यात्सर्वभूतानि' इत्यादीनामपि अर्थवादत्वं स्यात् । तथा च निषेधवार्ता लुप्येत । किञ्च यत्र हि निन्दान्यायेन अर्थवादस्तत्र वाक्यवैयर्थ्यं तन्त्रम् । तथा च ''यदृचा स्तुवते तदसुरा अन्ववायन्'' इति ऋचा स्तोत्रकरणेन असुरागमनं भवतीति ऋङ्निन्दा क्रियते । न च वृथा ऋङ्निन्दाकरणे प्रयोजनमस्ति । तथा चास्य वाक्यस्य वैयर्थ्यम् । तथा च नहि निन्दा ऋङ्निन्दार्थं प्रवृत्ता येन वाक्यवैयर्थ्यम् । अपि तु स्तुत्यं स्तोतुं । साम्ना स्तुवीतेति विधिः । तस्यायमर्थवादः । तथा च साम्ना स्तोत्रकरणे असुरागमनं नास्तीत्युक्तं भवति । एवं च नात्र वाक्यवैयर्थ्यं पशुप्रतिषेधार्थत्वात् अन्यथा बह्वतिप्रसङ्गस्योक्तत्वात् । तस्मात्पशुनिषेधो दुर्वारः । कथमिदानीं पशूनाममेध्यत्वनिर्णय इति चेत् । मास्तु निर्णयः ।

विषयुक्तान्नसन्देहस्य भक्षणमिव अमेध्यत्वसन्देहस्यापि अनुष्ठान प्रतिबन्धकत्वात् ।

२१. (अहिंसात्मकयज्ञानुष्ठाने महाभारतसम्मतिकथनम्)

अथ सुहृद्भावेन पृच्छन्तं प्रत्युच्यते । श्रीमन्महाभारते शान्तिपर्वणि मोक्षधर्मे नारायणीये कलियुगे धर्मनिरूपणावसरे-

'देवा देवर्षयः प्रोचुस्तमेवं वादिनं परम् ।
एकपादस्थिते धर्मे यत्र क्वचन गामिति ।।

कथं कर्तव्यमस्माभिर्भगवंस्तद्वदस्व नः' ।

(म.भा.शां- १२,३२७,७७)

श्रीभगवानुवाच-

'यत्र वेदाश्च यज्ञाश्च तपः सत्यं दमस्तथा ।
अहिंसाधर्मसंयुक्ताः प्रचरेयुः सुरोत्तमाः' ।।

(म.भा.शां- १२, ३४९)

इत्यत्र कलौ यज्ञादिष्वहिंसैव धर्म इत्युच्यते । अहिंसायुक्ता इत्येव वक्तव्ये धर्मग्रहणबलादेवं विज्ञायते । तथा च, वेदादिषु हिंसाविधाने तद्विरुद्धं भारतवाक्यं कथं प्रमाणं भवेत् ? अतः तत्प्रामाण्यसिद्ध्यर्थं 'पुरुषं वै देवा' इत्यादिवेदमुपजीवन्ति । तेन च तत्रोक्तामेध्यत्वेन हेतुनोक्तन्यायेन सर्वोऽपि विरोधः परिहृतो भवति । तथा च तद्व्याख्यानभूतेन भारतेनामेध्यत्वं कलिकाल इत्युक्तं भवति । यदा सुरोत्तमानामपि कलिकाले हिंसायुक्तयज्ञाननुष्ठानं तदा का वार्ता मनुष्याणामिति । तथा-

'अश्वालम्भं गवालम्भं सन्यासं पलपैतृकम् ।
देवरेण सुतोत्पत्तिं कलौ पञ्च विवर्जयेत्' ।।

इति स्मृतिश्चात्र प्रमाणम् ।

अत्र अश्वालम्भगवालम्भनिषेधः श्रूयते न च स युक्तः । 'योऽश्वमेधेन यजते' 'गामालभेत' इत्यादि बहुश्रुतिभिस्तयोर्विधानात् । 'अपशवो वा अन्ये गो अश्वेभ्यः पशवो गो अश्वाः' इत्यादौ अन्येषामपशुत्वेन निन्दया गवाश्वयोः प्रशंसनाच्च । तथा चोदाहृत स्मृतेः प्रामाण्यसिद्ध्यर्थे 'पुरुषं वै देवा' इत्यादिखण्डोपजीव नेनामेध्य त्वयुक्त्या 'योऽश्वमेधेन' इत्यादि यावच्छ्रुतिविरोधः परिहृतः । एवं च व्याख्यानरूपयोदाहृतस्मृत्या कलिकाले अमेध्यत्वं पर्यवस्यति । न चात्र गवाश्वयोरेव निषेधः न पश्वन्तराणामिति वाच्यम् । तथा सति ब्राह्मणालम्भापत्तेः। प्रशस्तयो र्निषेधे अप्रशस्तानामनिषेधस्य स्वत एव प्राप्तत्वात् तन्मूलभूतखण्डे पश्वानामप्यमेध्यत्वसाधारण्याच्च ।

तर्हि विहितं पश्वनुष्ठानं कदेति चेत् । श्रुणु । तत्रैव मोक्षधर्मे-

ततस्त्रेतायुगं नाम त्रयी यत्र प्रवर्तते ।
मोक्षिता यज्ञपशवो बन्धं प्राप्स्यन्ति वै मखे ।।

इत्यादिना 'पशुना यजेत' इत्यादित्रयीप्रवृत्तिकथनेन तदैव पश्वनुष्ठानमिति सङ्क्षेपः । अधिकं तु बहुवाक्योदाहरणेन तत्र विस्तृतश्चास्मत्कृतबृहत्पुरोडाशमीमांसायां द्रष्टव्यः । तस्मान्न कलिकाले पशुवधानुष्ठानमिति सिद्धम् ।

इति श्रीमत्पदवाक्यप्रमाणविदग्रेसराणां श्रीमत्सत्यविजयतीर्थ श्रीमच्चरणानां निजशिष्येण वरखेडीतिम्मणेन विरचिता लघुपुरोडाशमीमांसा समाप्तिगमत् ।।

।। श्रीकृष्णार्पणमस्तु ।।

***

श्रीसत्यबोधतीर्थश्रीमच्चरणनिजशिष्येण
श्रीनिवासाचार्येण विरचिता पिष्टपशुमीमांसा ।।

।। श्रीगणेशाय नमः ।। श्रीरमाकान्ताय नमः ।।

प्रणम्य श्रीवेङ्कटेशं इष्टदेवगुरूनपि ।
भक्त्या मीमांसनं पिष्टपशोः कुर्वे यथामति ।।

२२. मोक्षधर्मपर्वसम्मत्या पशुवधापाकरणम्

शान्तिपर्वणि मेक्षधर्मे नारायणीये —

''सवनीयपशोः काल आगते तु बृहस्पतिः ।
पिष्टमानीयतामत्र पश्वर्थमितिभाषत'' ।।

(म.भा.शां. ३४५.४) इत्यादि ।।

तथा ऋषय ऊचुः —

''बीजैर्यज्ञेषु यष्टव्यम् इति वै वैदिकी श्रुतिः ।
अजसञ्ज्ञानि बीजानि च्छागं नो हन्तुमर्हथ ।।

नैष धर्मः सतां देवाः कथं वध्येत वै पशुः ।
इदं कलियुगं श्रेष्टं कथं वध्येत वै पशुः'' ।।

(म.भा.शां- ३४५. ६,७)इत्यादि ।।

दानधर्मे युधिष्ठिर उवाच —

''अहिंसा परमो धर्म इत्युक्तं बहुशस्त्वया ।
श्राद्धेषु च भवानाह पितृनामिषकाङ्क्षिणः'' ।।

(म.भा. १३,११६,१)

इत्यादियुधिष्ठिरकृतप्रश्नस्य बहुधा परिहासमुक्त्वेदमुच्यते —

इदमन्यत्तु वक्ष्यामि प्रमाणं विधिनिर्मितम् ।
पुराणमृषिभिर्जुष्टं वेदेषु परिनिष्ठितम् ।।

प्रवृत्तिलक्षणो धर्मः तत्वार्थिभिरुदाहृतः ।।

(म.भा. अनुशा- ११५, ४६-४७)

इत्यादिना काम्ये कर्मणि प्रत्यक्षमांसमुक्त्वा निष्कामकर्मणि-

''य इच्छेत् पुरुषोऽत्यन्तं आत्मानं निरुपद्रवम् ।
स वर्जयेत मांसानि प्राणिनामिह सर्वशः ।

श्रूयते हि पुराकल्पे नृणां व्रीहिमयः पशुः ।
तेनाऽयजन्त यज्वानः पुण्यश्लोकपरायणाः ।।
ऋषिभिः संशयं पृष्टो वसुश्चेदिपतिः पुरा'' ।।

(म.भा. अनु- ११५, ४८-५०) इत्यादिना।।

नचाऽस्मिन्नर्थे वेदाभाव इति वाच्यम् । किं वेदसामान्याभावो विवक्षित उत पठ्यमानवेदाभावः । न तावदाद्यः । 'वेदेषु [४४]परिनिष्ठितम् । श्रूयते हि पुराकल्पे' इत्यादिना वेदसद्भावस्य प्रमितत्वात् ।

'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' ।।

(म.भा- १.२९३) इति ।

'वेदादप्युत्तमं चक्रे पञ्चमं वेदमुत्तमम्' ।।

(गी.भा. अ-१)इति ।

'अनुक्तं पञ्चभिर्वेदैर्न वस्त्वस्ति कुतश्चन ।
अतो वेदत्वमेतेषां यतस्ते सर्ववेदकाः' ।।

(ब्र.सू.भा- २.१.१६, स्कान्दोहृतवचनम्)इति ।

वेदादपि वेदोपबृंहकत्वादिना भारतस्य प्राबल्यकथनाच्च ।

न चैतद्भारतवाक्यमर्थवाद इति वाच्यम् । अर्थवादानां विध्येकवाक्यतया प्राामाण्येन तादृशविधेरुन्नयनात् ।

वेदे तन्मूलविधिसद्भावस्तु— **'बीजैर्यज्ञेषु यष्टव्यमिति वै**

---

४४ **परिनिष्ठितम् ।**

वैदिकी श्रुतिः'(म.भा.शां- १२-३४५) इति भारते स्पष्टमुक्तः । [४५]अन्यथाऽसति एकस्मिन्नपि वेदे 'वेदेषु परिनिष्ठितम्' इति वदतो बादरायणस्य प्रतारकत्वमेव स्यात् । न हि अनन्तशाखातत्त्वार्थविदो ब्रह्ममीमांसा सूत्रकृतो बादरायणस्य तद्युक्तम् ।

तदुक्तं [४६]तात्पर्यचन्द्रिकायाम्—(१.१.६)

''अनन्तशाखातत्वार्थविदा सूत्रकृतेरितम् ।
कूपमण्डूकवत्स्वल्पवाक्यज्ञोऽन्यथयेत्कथम्'' ।। इति

२३. (श्रुतिस्मृत्योर्विरोधे अविरोधसम्पादनक्रमः)

न च **'अग्नीषोमीयं पशुमालभेत'** इति विधिविरोध इति वाच्य म् । विरोधपरिहारेण उभयविधवाक्यस्यापि परिपालनीयत्वात् । अन्यतराप्रामाण्यकथनस्य वेदबाह्यकृत्यत्वात्[४७]..........।

तदुक्तं प्राचीनैः—

''गृष्ट्योर्विरोधे सम्प्राप्ते हत्वैकामपराङ्मुखीम् ।
विरोधशान्तिं कः कुर्याद् विना म्लेञ्छकुमारकान् ।।

तृणपिण्याकदानेन कृत्वाऽर्थान्तरलालसाम् ।
ततः प्रच्यावयेदेकां क्रुद्धाप्यन्याध्वमाव्रजेत् ।
तां तदर्थपरां कृत्वा मोचयेत् कलहं तयोः' ।।

(गुण- ५२०-५२२)

''एकं प्रमाणमितरं त्वप्रमाणं तयोर्भवेत् ।
श्रुत्योरिति वदेद्यस्तु वेदबाह्यो भवेत्तु सः'' ।।

इत्यादि व्यवस्था तु **'पशुमालभेत'** इति सामान्यतः श्रुतस्य पशुशब्दस्य छागस्य वपाया मेदस इति विशेषश्रवणात् छागे

---

४५ **अन्यथा सति ।**
४६ **तात्पर्यार्थचन्द्रिकायाम् इति मुद्रिते**
४७ **ग्रन्थपातः**

पर्यवसानवत् ऋग्वेदब्राह्मणानुसारेण पिष्टपशुपरतया उदाहृत श्रीमन्महाभारतवाक्य एवं सिद्धान्तः ।। श्रौतपशुशब्दस्य प्रत्यक्ष इत्यार्थकत्वे देवताधिकारिकत्वम् । अत एव दानधर्मे- **‘ऋषिभिर्निर्ऋतिर्नृणाम्’** इति चोक्तम् ।।

नचानेनैव न्यायेन अश्वमेधादेरपि अनुष्ठानं स्यादिति वाच्यम् ।

‘अजसञ्ज्ञानि बीजानि छागं नो हन्तुमर्हथ’ ।

इति प्रत्यक्षछागनिषेधेन बीजविधानवत् तत्र तदभावात् । **‘अश्वालम्भं गवालम्भम्’** इत्यादिना अश्वमेधादीनां स्वरूपेण निषेधात् । नहि **‘अश्वालम्भम्’** इति वाक्यस्य भारतवाक्यस्य च वाक्यत्वाविशेषे अन्यतरानुग्रहेण अन्यतरबाधो युक्तः ।। तस्मात्प्रसिद्ध लोकाद्याचारणादेशभेदेन व्यवस्थावत् अश्वमेधादीनां कालभेदेन व्यवस्था वत् पात्रकर्तृभेदेन व्यवस्था द्रष्टव्या ।

२४. (अधिकारिभेदेन कालभेदेन च व्यवस्था)

न हि यथाश्रुत एव वेदवाक्यार्थः । तथा सति **‘आज्यैः स्तुवते, पृष्ठैः स्तुवते, अन्धो मणिमविन्दत्’** इत्यादेरपि यथाश्रुतमात्रार्थकत्वापत्या मीमांसोच्छेदप्रसङ्गात् । किन्तु उपक्रमन्यायनिर्णीतः प्रमा णान्तरसहकृतश्च । सत्यप्येवं दुराग्रहाद् प्रत्यक्षपशुमेव कुर्वतां त्रिविक्रम त्वसम्भृतिद्युव्याप्तिवेधाद्युपासनमपि सर्वसाधारणमङ्गीकर्तव्यं स्यात् । ततश्च **‘समान एवं चाभेदात्’** (ब्र.सू,३.३.२९.), **‘सम्भृतिद्युव्याप्त्यपि चातः’**...(ब्र,३.३.२३), **‘वेधाद्यर्थभेदात्’**(३.३.२५.) इति ब्रह्ममीमांसासूत्रैः (प्रतिपादितं सर्वसाधारणं स्यात् ।)

“गुणास्त्रैविक्रमाद्याश्च संहर्तव्या न संशयः ।
विरिञ्चस्यैव, नान्येषां स हि सर्वगुणाधिकः” ।।

(ब्र.सू.भा- ३.३.२१) इति ब्रह्मतन्त्रवचनेन,

“देवादीनामुपास्यास्तु भूतिव्याप्त्यादयो गुणाः” ।

(ब्र.सू.भा- ३.३.२४) इति ब्रह्मतर्कवचनेन,

“भिन्धि विद्धि शृणीहीति फलभेदेन सर्वशः ।
यत्यादीनां तेष्वयोगान्नाऽधिकारैकता भवेत् ।।
अयोग्योपासनादीयुः अनर्थं चार्थनाशनम्” ।

(ब्र.सू.भा- ३.३.२६)

इति ब्रह्मतर्कवचनेन विरोधोऽपि नादरणीयः स्यात् । ततश्च तदुपासकानां स्वस्मिन् विरिञ्चत्वादिकमप्यभिमतं भवेत् । तच्च निषिद्धम् । **‘न चाधिकारिकमपि पतनानुमानात्तदयोगात्’** (ब्र.३.४.४१.), **‘उपपूर्वमपि त्येके भावशमनवत्तदुक्तम्’** (ब्र,३.४.४२) इत्यादि ।

न चैतत् सर्वं गुणोपासनादिपरं न तु कर्मपरमिति वाच्यम् । कर्मणोऽप्यग्निप्रतीके भगवदुपासनारूपत्वात्, तस्मद्भेदसामान्याभाव इति वक्तुं न युक्तम् ।

न च प्राणिपीडनस्यैव हिंसाशब्दार्थत्वेन पिष्टपशुपक्षे कथं हिंसाशब्दार्थलाभः । कथं वा ‘व्रीहियवमयीरपः पाययेत्’ [48]इत्युक्ताऽपानादिलाभ इति वाच्यम् । **‘मा भेर्मा संविक्था मा त्वा हिंसिषम्’** इत्यनेन हिंसादीनां प्रतिपादनदर्शनेन तेषामपि प्राणित्वात् । तदुक्तम्-

‘हविः कपालयूपाद्या देवता एव सर्वशः’ ।(बृ.उ.भा-३,१)इत्यादि ।

‘अपः पाययेत्’ इत्यादेस्तु वरुणप्रघासे मेषमेष्योः शमीपर्णकरीरप्रक्षेपवत् कृष्णलश्रपणादिवच्चादृष्टार्थत्वोपपत्तेः । कृष्णलश्रपणादिकं च [49]पूर्वमीमांसापञ्चमस्य द्वितीये पादे विचारितम् । ‘कृष्णलेष्वर्थलो

48 **इत्युक्तः पानादिलाभ इति स्यात् ।**

49 पूर्वमीमांसादशमस्य इति पाठः साधुः ।

पादपाकः स्यात्'(जै.सू. १०.२.१) इत्यधिकरणेषु **''प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः''** इति वाक्यविहितेषु कृष्ण लशब्दितेषु स्वर्णमाषेषु घृते श्रपयतीति 'प्रत्यक्षश्रुतिविहितोऽपि विक्लेदनायोग्यत्वान्न कर्तव्य' इत्यनेन [५०]सूत्रेण पूर्वपक्षं [५१]प्राप्य 'प्रत्यक्षशिष्टत्वात्प्रदानवत्'(जै.सू-१०.२.२) इत्युत्तरसूत्रेण राद्धान्तितम् । दृष्टार्थस्य विक्लेदनस्याऽसंभवेऽपि अदृष्टार्थं पाकः कर्तव्यः । अनदनीयस्यापि यथा प्रदानं तद्वत् । अन्यथा विधिवैयर्थ्यापत्तेः **''तथा भक्षणन्तु प्रीत्यर्थत्त्वादकर्म स्यात्''**(जै.सू. १०.२.१३) इत्यधिकरणे । यथा पुरोडाशे प्राशित्रादिभागो भक्ष्यते न तथा तेषु कृष्णलेषु भक्षोऽस्ति । प्रीतिरूपदृष्टद्वारस्याऽभावात् ।

यत्तु चुश्चुषाकारं भक्षयन्तीति इक्षुदण्डादिभक्षणे तद्रसस्वीकारोत्पन्नशब्दं समानं शब्दपूर्वकभक्षणविधिवाक्यम् । तत्तु घृतेषु श्रुतेषु लिप्ताज्यस्यैव भक्षणविधायकमिति पूर्वपक्षं प्राप्य राद्धान्तितम् । प्राजापत्यं घृते चरुमिति कृष्णलानां प्राधान्येन घृतस्य च गुणत्वेन निर्देशा त् प्रधानानामेव फलवाक्यान्वयस्यौचित्यात्तेषां [५२]चानदनीयानामपि वचनबलात् भक्षणमुपपन्नमिति चुश्चुषाकारविशिष्टभक्षणं कृष्णलानां विधीयत इति कार्यमेव तदिति[५३] । न च तत्रोच्येत (किमपि लुप्तम्)? तथा स्वीकारेऽपि प्रकृते विधिविषयस्य प्रत्यक्षपशोरेव कर्तुं शक्यत्वे किमेतावता प्रयासेनेति वाच्यम् । न हि कर्तुं शक्यत्वमात्रं करणे प्रयो जकम् । तथात्वे परनारीगमनब्रह्महिंसाऽवध्यपश्वादेरपि करणापतेः । किन्तु विधिनिषेधशास्त्रपर्यालोचने सति । अस्ति च प्रत्यक्षपशोर्निषेधः पिष्टपशोरेव च विधिरित्युक्तम् । अतो युक्त एतावान् प्रयासः ।। सत्यप्येवं प्रत्यक्ष

५०. सूत्रेण इति पदं त्याज्यम् ।
५१. विधाय
५२. चान्वदनीयानापि इति पाठः साधुः ।
५३. पू.मी- १०.२.३

पशुस्वीकार एव ऐहिकपारत्रिकमहाप्रयासहेतुरिति सूत्रैरेव ज्ञातुं शक्यत इत्यलम् ।।

२५. (उक्तेऽर्थे मीमांसकसम्मतिकथनम्)

किं च मन्त्राधिकरण एव 'ऊनः'(जै.सू. १.२.५२) इति गुणसूत्रेणा ग्नीषोमीयाच्चोदकेन पशुगणं प्राप्ते-

'अन्वेनं माता मन्यतामनु पिताऽनु भ्राता' ।

[५४]अध्वर्युप्रैषगते वाक्ये मात्रादिपदानामूहप्रतिषेधपरमेकवचनान्तं मात्रादिपदं न बहुवचनान्तं रूपवृद्धिमामाप्नुयादित्यर्थकं **'न माता वर्द्धत'** इति वचनमन्यत्रोहास्तित्वावगमकतया मन्त्राणामर्थविवक्षायां लिङ्गमुपन्यस्तम् । अत्र यथा पशुगणे मात्रादिपदानाम् एकवचनान्तानाम समवेतार्थतयोच्चारणमदृष्टार्थमेकस्मिन् पशौ दृष्टार्थमित्येकस्यैव प्रयोग भेदेनोभयार्थत्वं तथा प्रकृतेऽपि ।

अत्र यत्कश्चिदाह- 'पशुगणे मात्रादिशब्दानामेकवचनान्तानामसमवेतार्थत्वे स्यात् तदुच्चारणम् अदृष्टार्थम् । नत्वेतदस्ति तेषां पशुपरेण 'एनम्' इति शब्देन सहान्वयाभावात् । किन्त्वनुमन्यतामि त्यनेनान्वयः । स च तत्तत्प्रतिसंबंधित्वाभिप्रायेण-

ये मानवा विगतरागपरावरज्ञाः
नारायणं सुरगुरुं सततं स्मरन्ति ।
ध्यानेन तेन हतकिल्बिषचेतनास्ते
मातुः पयोधररसं न पुनः पिबन्ति ।।

(श्रीकृष्णामृतमहार्णवः- ५०)

इति श्लोक इवैकवचनान्तत्वेऽप्यविरुद्धः । अतोऽर्थसमवायान्न तदुच्चारणमदृष्टार्थम् । 'न माता वर्धत' इति वचनं न्यायप्राप्तानूहानुवाद मात्र[५५]परं न प्राप्तोहप्रतिषेधार्थम् ।

५४. इत्यविधगुप्रैषगत इति पाठः समीचीनः ।
५५. मात्रं प्राप्तोह... ।

उक्तं च राणके- **''एकमात्रादिसम्बन्धे पशुभेदेऽपि मात्रादिशब्दोहस्यानाशङ्क्यत्वात्। मात्रादिभेदेऽप्येकपशुक सम्बन्धा भावात् सम्बन्धिभेदादेव तद्भेदसिद्धेः न्यायादेवानूहावगतः इति''** । अतः वचनबलाद् दृष्टार्थत्वासंभवात्कथमयं दृष्टान्तः इति ॥

अत्र ब्रूमः । साक्षात्पशुपरेदं शब्दान्वयाभावेऽपि बहुत्वेनावग तत्तत्कर्मिकायामनुमतिक्रियायामेकस्य मात्रादेन्वयासंभवात्तदन्वय घटनाय बहुवचनान्तत्वेन तेषां पदानामूहावश्यम्भावात् । **'मातुः पयोधररस म्'** इत्यादिकं तु गौणतयाप्युपपन्नम् । नेह तदाश्रयेण प्रमाणमस्ति । एवं चात्र वचनबलादेवानूहोप्यङ्गीकार्यः ॥

तस्मादेकवचनान्तानां तेषामुच्चारणं पशुगणे अदृष्टार्थमित्यकामेना प्याश्रयणीयमिति नादृष्टार्थतानुपपत्तिरिति । 'व्रीहियवमतीरपः पापयेत्' इत्यादेर्दृष्टार्थत्वेऽपि नाऽनुपपत्तिः । हविष्ट्वयोग्यस्य जीवस्य-

'अबुद्धिपूर्वमरणात्स्वर्गश्चापि पशोर्भवेत्' ।

इति स्वर्गयोग्यतया देवतात्वेन तदीयभक्षणादिव्यापारस्या ऽप्यदृष्टार्थत्वसंभवात् । तदुक्तम्-

'पृथिव्याद्यभिमानिन्यो देवताः प्राथितौजसः ।
अचिन्त्याः शक्तयस्तासां दृश्यन्ते मुनिभिश्च ताः ॥
ताश्च सर्वगता नित्यं वासुदेवकसंश्रयाः'॥

(ब्र.सू.भा- २.१.६) इति ॥

सारभागस्यैव भक्षणेन स्थूलभागस्य यथापूर्वं दर्शनसंभवाच्च । नापि द्वितीयः । स्वस्वशाखागतत्वेन कतिपयवाक्याध्येतृभिरस्माभि रव्यायस्य भावस्याभावनिश्चायकत्वा योगात् । तथा सति बहुविप्लवापत्तेः । पठ्य मानवेदविदितानुबंध्यपशुपरित्यागेन[५६]

---

[५६]. गौरनुबन्ध्यः इति पुंगवस्य विधानेपि गवालम्भस्य निषिद्धत्वात्

तत्स्थाने मैत्रावरुणामिक्षायाः सर्वैरप्यनुष्ठेयमानत्वात् । वाजपेययागादौ सुराग्रहपरित्यागेन प्रतिनिध्युपादानस्य सर्वैरपि क्रियमाणत्वाच्च । तत्रैकः पठ्यमान वेदोऽस्ति । नच तत्र 'अश्वालंभम्' इत्यादिनिषेधबलेन मैत्रावरुण्यामिक्षां बह्वृचाः समामनंति-

'अन्नस्य वा एतच्छमलं यत्सुरा' ।

(तै.सं.भा- का.१, प्र.७, अ- ७)

इति चोक्त्यनुसारमिति वाच्यम् । अत्रापि व्यासप्रोक्ते सत्वात् ।

२६. (ऋग्वेदब्राह्मणसम्मत्या व्रीह्यादिनैव यागनिर्वाहोपपादनम्)

किं च सर्वैः पठ्यमान एव ऋग्वेदब्राह्मणद्वितीयपञ्चिकायां अष्टमखण्डे **'पुरुषं वै देवा पशुमालभन्त'** (मैत्रायणीसंहिता- का-३, प्र-९) इत्यादिना पुरुषादिभ्यो मेधोत्क्रमेणमुक्त्वा-

''त एत उत्क्रान्तमेधाऽमेध्याः पशवस्तस्मादेतेषां नाश्नीयात् । तमस्यामन्वगच्छन्सोऽनुगतो व्रीहिरभवत् तद्यत्पशौ पुरोडाशमनुनिर्वपन्ति समेधेन नः पशुनेष्टमस त्केवलेन नः पशुनेष्टमसत्समेधेन हास्य पशुनेष्टं भवति । य एवं वेद'' । इति व्रीहीणामेव मेध्यत्वकथनात् ।

न च **'अनुनिर्वपन्ति'** इति श्रवणात् अनुनिर्वाप्येष्टिप्रकरणमे तदिति वाच्यम् । तथा सति पश्वमेध्यत्वोक्तेः अनुपपत्तिप्रसङ्गात् । न हि अनुनिर्वाप्येष्टौ पश्वमेध्यत्वं निमित्तम् । न वा अमेध्येनेष्ट्वा ततः पशुपुरोडाशो निर्वाप्य इति विशेषविधिरस्ति । न च अनुनिर्वाप्येष्टिः अमेध्यमेध्ये प्रायश्चित्तरूपम् । किन्तु छिद्रापिधानमेव च निमित्तम् । अत एव एकादशखण्डे-

'यदेष हविरेव यत्पशुरथाहास्य बह्वपैति लोमानि त्वग सृक्कुष्ठिकाः शफाः विषाणेस्कन्दंति पिशितं केनास्य पूर्यते'

तत्परित्यागेन मैत्रवरुणमिक्षानुष्ठानमित्यर्थः ।

। इति । **'यदैवैतत्पशौ पुरोडाशमनुनिर्वपन्ति तेनैवास्य तदापूर्यते । पशुभ्यो वै मेधा उदक्रामंस्ता व्रीहिश्चैव यवश्च भूतावजायेताम्'** ।। इत्याद्युक्तम् ।

किञ्च यदि पश्वमेध्यत्वमेव अनुनिर्वाप्येष्टौ निमित्तं स्यात् तर्हि सवनीयपश्वनुष्ठानानन्तरमपि अनुनिर्वाप्येष्टिः कर्तव्या स्यात् । छिद्रापिधानार्थत्वे तु छिद्रापिधानं सवनीयैः कृतमिति पशुपुरोडाशो न क्रियत इत्युक्तत्वात् पुरोडाशकरणं युक्तम् ।

ब्राह्मणवाक्यार्थस्तु त एते पशवः पूर्वोक्त पुरुषाद्याः उत्क्रान्तमेधाः । हेतुगर्भविशेषणमेतत् । उत्क्रान्तमेधत्वात् अमेध्याः तस्मादेतेषां मांसमिति शेषः ।। नाश्नीयात् ।। तं मेध्यं अस्यां व्रीहौ पशव इति शेषः । अन्वगच्छन् प्रविष्टाः? । समेधः । पशुनेति शेषः । अनुगतः । व्रीहिरभवात्तस्मात्कारणादेव मेधस्य पशूनां च व्रीहिषु प्रविष्टत्वादेव पशौ कर्तव्ये तत्स्थाने पुरोडाशं पिष्टपिण्डत्वसादृश्यात् पुरोडाशशब्दः पिष्टपशुमित्यर्थः । श्रीमन्महामारते पश्वर्थमिति भापतेति ?। व्रीहिमय : पशुरिति चोक्तेः । अव्ययादीनामनेकार्थत्वात् अनु सम्यङ् निर्वपन्ति कुर्वन्तीति यावत् ।

तदित्यावर्तते । समेधेन मेधसहितेन पशुना मेधपशोः उभयोरपि व्रीहिषु प्रविष्टत्वात् नास्माकम् इष्टं वस्तु स्यात् । केवलेन मेध्यामिश्रेण पशुना प्रत्यक्षपशुना इष्टं नः असत् अप्रशस्तम् इत्यभिप्रेत्य न हि चतु रो मुष्टीन् निर्वपतीति यो निर्वापशब्दार्थः स एव सर्वत्र निर्वापशब्दार्थः भवति । तथात्वे

'महीनां पयोस्योषधीनां रसः तस्य तेऽक्षीयमाणस्य निर्वपामि देवयज्यायै' ।।

इति आज्यग्रहणे निर्वाप, शब्दानुपपत्तिप्रसङ्गात् । तस्मद्धातूनामनेकार्थत्वात् निर्वपन्ति कुर्वन्तीत्येवार्थो युक्तः । ततश्चाष्टमखण्डस्याग्नीषोमीयादिसर्वपशूनां पिष्टरूपेण कर्तव्यत्वे तात्पर्यं व्रीहिष्वेव पश्वङ्गसाकल्यप्रतिपादनपरम् ।। नवमखण्डस्य अनुनिर्वाप्येष्टिपरत्वम्

त्वेकादशखण्डस्य तत्र छिद्रापिधानमिति नैमित्तिकोक्तेः अत्र पश्वमेध्यत्वमात्रस्योक्तेः तावन्मात्रस्य निमित्तत्वाच्चेति तात्पर्यद्योतनायैव फलमाह- **समेधेनेति ।।** य एवं वेद अस्य समेधेन पशुना इष्टं भवतीह केवलेन तु शुद्धेन पशुना इष्टं भवति । हेत्याश्चर्ये । एकादशखण्डे तु पशौ कृते अनु अनन्तरमेव पुरोडाशं निर्वपन्तीति यथार्थश्रुत एवार्थः । पशुमालभ्य पुरोडाशं निर्वपन्तीत्युक्तेः, अग्नीषोमीयस्य वपया प्रचर्याग्नी षोमीयं पशुपुरोळाशमनुनिर्वपन्तीति चोक्तेः । न त्वङ्गहोमप्रतिनिधितया आज्यहोमादिकं कर्तुं शक्यं किं पुरोळाशनिर्वापेनेत्यतोऽष्टमखण्डोक्तं **स्मारयति 'पशुभ्यो वै मेध'** इत्यादिना व्याख्यानात् । पूर्ववदेव उपलक्षणतया नवखण्डोक्त मङ्गसाकल्यं च । अतः पुरोडाशनिर्वाप एव उक्त इति । न चैतत् न हि निन्दान्यायेन व्रीहिप्रशंसातात्पर्यकमेव । न तु पशुनिषेधकमिति वाच्यम् । न हि स्तुतिन्याये व्रीहिषु ज्ञातव्यं पशुनिषेध एव तात्पर्यं **'न तु व्रीहिप्रशंसायाम्'** इति वक्तुं शक्यत्वात् ।। तदुक्तं प्राचीनैः-

''मीमांसकानां न हि निन्दनस्य
न्यायापरस्यात्कुलधर्म एव ।।
न हि स्तुतिन्यायमपि प्रकल्प्य
प्राशस्त्यहानिं च परे विदध्यात् ।
विधेयान्तरासन्निधानेऽपि निन्दा
यदा मन्दतोऽप्यस्तुतौ पर्यवस्येत् ।।
सुरापाननिन्दाप्यहो सोमपान
स्तुतावेवकस्मान्न विश्रान्तिमेति'' ।। इति ।

नचाऽयं न्यायो मीमांसासम्मत इति वाच्यम् ।। न हि वयं मीमांसकानां किङ्कराः । न तदुक्तिमनुसृत्यैव सर्वं वक्तव्यमिति निर्बन्धः ।। तथा सति तदुक्तचतुर्थ्यंतशब्ददेवतात्वादेरप्यङ्गीक

र्तव्यतापातात् ।। इति सर्वं समञ्जसम् ।।

यो व्यासवंशेऽजनि तिर्मलार्य-
स्ततोऽजनि श्रीनिवासाभिधानः ।

विद्वानभूत्सोमयाजी स पिष्ट
पशुं कृत्वा चाकरोत्तन्निबन्धम् ।।

मया रचितया पिष्टपशुमीमांसयाऽनया ।
श्रीसत्यबोधगुर्वब्जहृद्गतः प्रीयतां हरिः ।।

।। इति पिष्टपशुमीमांसा समाप्ता ।।

।। इति श्रीमत्सत्यबोधतीर्थश्रीमच्चरणनिजशिष्येण श्रीनिवासाचार्येण विरचिता पिष्टपशुमीमांसा समाप्ता ।।

***

।। श्रीः ।।

विश्वनाथश्रौतिकृतः

४. यज्ञेषु पश्वालम्भनिषेधः

२७. (यज्ञेषु पश्वालम्भनं प्रतिनिधिकल्पनेनैव शक्यमिति समर्थनम्)

भो भो मान्यतमाः, शृण्वन्तु वैदिकं धर्मनिर्णयं युक्तियुक्तं यज्ञेषु पश्वालम्भनविषये । विदितमेवेदं भारतीयानां शाश्वतं धनं वेदराशिरेवेति । तादृशवेदराशेः अर्थं विचारयन्ती मीमांसा द्विधा प्रवर्तिता, पूर्वमीमांसा उत्तरमीमांसा चेति । तत्र पूर्वमीमांसा यज्ञसंबन्धिनी ''आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्''(जै.सू. १.२.१) इति वदन्ती विजयते । सृष्टेरारभ्य अद्यावधि यायजूका उपनयनादारभ्य अध्ययनादिषट्कर्मनिरताः याजयन्तः विलसन्ति । तथापि गच्छता कालेन तत्र तत्र मतिभेदः प्रादुरभूत् । अपि च केचन धर्माः युगानुरोधेन निष्कासिताः । केचन धर्माः पूर्वाचार्यैरेव कलिवर्ज्या इति त्यक्ताः । यथा **''वशामालभेत''** इति वेदचोदितेषु यज्ञेषु गवादिपशुसाध्येषु यज्ञेषु 'गवालम्भ वर्जनम्' इत्यादि । अयं तिष्ययुगारम्भकाल एव निषेधः निबद्धः । अथापि केचन आस्तिकंमन्वानाः यायजूकाः निषेधम् अविगणय्य अजान् उपालभमाना (मारयन्तः), प्राकृतान् स्वाश्रितान् जनान् वञ्चयन्तः, वैदिकं कर्म रक्षामः इति साटोपं प्रेरयन्तः, यज्ञेषु अजान् मारयन्तः, तेनैव आत्मनः कृतकृत्यान् मन्वानाः ककुद्मन्त इव दृश्यन्ते । बहोः कालात् अयं भारतदेशः वैदेशिकैः यवनैः क्रैस्तवैश्च वेदानभिज्ञैः शासितोऽभूत् । तथाऽपि ते शासकाः वैदिकधर्मविषये हस्तन्यासं नाकुर्वन् । यदा पुनः अयं देशः परदेशीयशासनात् विमुक्तः सन् स्वतन्त्रः सञ्जातः, तदा अस्मदीयाः शासकाः भारते देशे वर्णविभागशून्यं धर्मम् उपदिष्टवन्तः । अत्र वयं वैदिकाः सर्पदंष्ट्रालग्ना भेका इव वर्तामहे । ईदृश्यां दशायां सनातनधर्मानुयायिनः केचन

वैतानिके पथि कलिवर्ज्यप्रकरणस्थं ''**शामित्रं चैव विप्राणाम्**'' इत्येतत् प्रमाणम् उपेक्षमाणाः पश्वालम्भनपिशाचाभिभूताः लौकिकान् आस्तिकजनान् दुर्बोधयन्तः ककुत्स्थंमन्याः दृश्यन्ते । शास्त्रैकप्रमाणेषु यज्ञकर्मसु आवापोद्वापयोः अवकाश एव नास्ति । यत्र यत्र साक्षाद्वाक्यानि तत्र तत्र दृष्टानुविधिरेवेति न कोऽपि संशयः । तादृशप्रत्यक्षवाक्यानुपलम्भे, न्यायनयनेन वा चोदकेन वा पदार्थाः संपादनीयाः । यथा आभिचारिके श्येनसोमयागे ''**रक्तोष्णीषा ऋत्विजः प्रचरेयुः**'' इति प्रत्यक्षवाक्यात् रक्तवस्त्रशिरोवेष्टनम् अनितरयज्ञसाधारणं विहितम् । तस्मिन्नेव श्येनसोमयागे तृतीयसवने यज्ञायज्ञीयस्तोत्रकाले सर्वेषां शि रोवेष्टनं सर्वप्रकृतिभूत ज्योतिष्टोमातिदेशप्राप्तं साधारणं च शिरोवेष्टनं कर्तव्यम् । एवं स्थिते प्रातरारभ्य रक्तशिरोवेष्टनवताम् ऋत्विजां यज्ञायज्ञीयार्थं पुनः शिरोवेष्टनं नैव शक्यं भवति । पूर्वमेव वेष्टितशिरस्कत्वात् । अतः चोदकप्राप्तं यज्ञायज्ञीय-कालिक-शिरोवेष्टनं बाधित्वा श्येने सोमयागे सुत्येऽहनि प्रातरारभ्य रक्तोष्णीषवन्त एव ऋत्विजः प्रातःसवनप्रभृतितृतीयसवनान्तं प्रचरेयुः, नोपरि पुनः शिरोवेष्टनं कुर्युरिति विशिष्य विदधाति श्रुतिः । एवं तत्तत्कालावच्छिन्नेषु वैतानिककर्मसु तिष्ययुगे औत्सर्गिकान् पश्वालम्भनादिकान् बाधित्वा

''**अश्वालम्भं गवालम्भं संन्यासं पलपैतृकम् ।**
देवरेण सुतोत्पत्तिं कलौ पञ्च विवर्जयेत्'' ।।

इति स्मृतिः ।

कण्ठरवेण अग्नीषोमीयादिपश्वालम्भनं निषेधति स्म । अधुना याज्ञिकधुरीणाः गवालम्भपदस्थगोशब्दस्य गोजातिमात्रपरत्वं भावयन्तः यज्ञकर्मसु अजादीन् आलभन्ते । क्वचिद् गवार्थे च अजानेव । नैतद्युक्तम् । [५७]यतः 'काकेभ्यो दधि रक्षताम्' इत्युक्तौ काकशब्दः न खलु काक मात्रपरः, किं तु दध्युपघातकानां

५७. गोशब्दः अजाद्युपलक्षकः

मार्जारादीनामपि बोधनपरः । तथा अत्रापि गो-शब्दः अजादीनप्युपलक्षयति । अतः गवालम्भनिषेधेन अजाद्यालम्भनमपि निषिद्धं कलियुगे इति सिध्यति । एवमेव ''**गोब्राह्मणेभ्यः शुभमस्तु नित्यम्**'' इत्यादिष्वपि गोशब्दः गवादिसप्त ग्राम्यपशून्, ब्राह्मणशब्दः ब्राह्मणादिवर्णांश्च सर्वान् बोधयतीति विभावयेत् । केचन गोब्राह्मणशब्दयोः गोब्राह्मणमात्रबोधकतां मन्वानाः लोकविद्वेषभिया इमं पाठमेव परित्यजन्ति । ''**अदीक्षिष्टायं ब्राह्मणः**'' इति मन्त्रोच्चारणकाले विद्यमानब्राह्मणशब्दोऽपि त्रैवर्णिकपर एव । आपस्तम्बश्रौतसूत्रे (प्र १० सं. ११ सूत्रम् ६) ''**ब्राह्म णो वा एष जायते यो दीक्षते**'' इत्यादिना एतत् सुस्पष्टं भवति । अन्यच्च ''**अनिर्दशाया गोः पयः**'' इति अभक्ष्यप्रकरणे भार्गवे मनुध र्मशास्त्रे पञ्चमाध्यायेऽष्टमे श्लोके अनिर्दशायाः गोः पयः निषिद्धम् । अयमर्थः- नवप्रसूतायाः गोः यावद्दशममहः न व्यपेयात् तावत् तस्याः गोः पयः न पातव्यम् इति । एकादशाहादारभ्यैव हविरर्थे पानार्थे च तस्याः पयः ग्राह्यमित्यवसीयते । तथा च श्रुतिः ''**तस्माद्वत्सं जातं दशरात्रीर्न दुहन्ति**'' (तै. ब्रा. अष्ट. २ प्र. १ अ.१) इति ।। इमां श्रुतिम् अवलम्ब्य भार्गवमनुस्मृतेः व्याख्यातारः मेधातिथि-गोविन्दराज- कुल्लूकभट्टादयः अनिर्दशायाः गोः पय इत्यत्र ''**गो**''शब्दः अजादीनप्युपलक्षयतीति व्याचख्युः । अतः प्रवर्ग्ये अजापयः स्वीकारे निर्गतदशदिनवत्या अजायाः एव पयः स्वीकर्तव्यमित्यवसीयते । एवं गोवधनिषेधदर्शनात् अजादीनामपि यज्ञेषु अवध्यत्वं प्रापयति । कालवशादेव दशाहाभ्यन्तरे गोः अजायाः च पयः निषिद्धम् । एकादशाहात् न दोषाय भवेत् । दशाहाभ्यन्तरे निषिद्धस्य पयस इव यावत्तिष्ययुग कालः तावत् हविरर्थे निषिद्धस्य गोमांसस्येव अजमांसस्यापि निषेधः प्राप्त एव । पुनः कृतयुगादौ नैष दोषः इति च ज्ञायते । एतदनालोच्य गोशब्दस्य वाच्यार्थमात्रं गृहीत्वा कलौ युगे गोरेव वधस्य निषेधः इति वदतां ''काकेभ्यो दधि रक्षताम्'' इत्यत्र काकशब्दस्य

काकमात्रपरतां वदतां च यथाश्रुतग्राहित्वे को भेदः ? अहो ! तिष्ययुगे वेदप्रमाणता क्वचित् पश्वालम्भनमात्रे प्रविष्टा । लक्षणाभयात् वयं गोशब्दस्य अजादिबोधकतां नाङ्गीकुर्मः इति चेत्, न । वेदस्य परमतात्पर्यभूते जीवब्रह्मैक्यबोधके महावाक्याभिधे **''तत्त्वमसि''** वाक्ये जहदजहल्लक्षणयैव खलु श्रीभगवत्पादाः जीवब्रह्मणोरभिन्नत्वं स्थापितवन्तः अखण्डार्थवादे । एवं स्थिते **''प्लवा ह्येते अदृढा यज्ञरूपाः'' (मुण्डक.उ.१.२.७)** इति मुण्डके अनित्यत्वेन विख्यातेषु यज्ञेषु युगानुरोधात् प्राप्तेन गो वधनिषेधेन अजादिवधस्यापि उपलक्षणविधया अजवधनिषेधे गृहीते अस्मत्तातपादानां का हानिः । अथ च **''अग्नीषोमीयं पशु मालभेत''** इत्यत्र पश्वालम्भनं (मारणं) विहितम् । अग्नीषोमीयम् इति तद्धितान्तं पदं पशोः विशेषणं च दृश्यते । अत्र पृच्छामः अत्रायं पश्वालम्भविधिः किं पशुमारणमात्रे ? आहोस्वित् अग्नीषोमाभ्यां देवाभ्यां दातव्यमांसार्थे इति ? यदि मारणमात्रे इत्युच्यते तर्हि देव्युपासनादिषु यथा देव्याः पुरतः पशोः कण्ठच्छेद एव अपूर्वप्रदः तथा अत्रापि पशोः संज्ञपनद्वारा मारणमेव अपूर्वप्रदातृ इति अङ्गीकर्तव्यं भवेत् । न खल्वेवम् अङ्गीक्रियते । पशुमारणोत्तरं तदीयवपादीनां गृह्यमाणत्वात् । अतः हविरर्थे एव मारणम् इति अङ्गीकर्तव्यं भवति । अत्र किञ्चित् परिशीलयामः । बहूनां हविषां मध्ये मांसमयम् एकं हविः । क्रत्वङ्गभूत मांससंपादनार्थं हनने हिंसा भवतीति मा शङ्किष्ठाः । **''हननं कुरु''** इति, **''आलभेत''** इति अनेन आख्यातेन प्रभुसंमिता श्रुतिः हिंसां विदधाति । सः विधिः कलियुगे माऽस्त्विति धर्मज्ञसमयः । बहूनां हविषां मध्ये कस्यचन अलाभे तत्प्रतिनिधिं कृत्वा कर्म समाप्यते । यथा तिलादीनां ग्राम्यौषधीनां वेण्वाद्यारण्यौषधीनां च अलाभे **''यवान् मधुमिश्रान् वपेत्''** इति सूत्रेणैव प्रतिनिधिः कल्पितः । अन्यत्र तु **''शिष्टाभावे सामान्यात् प्रतिनिधिः'' (आपस्तम्भ परिभाषासूत्रम्)** इति न्यायसूत्रानुरोधेन ओषधीनां प्रतिनिधिं कल्पयामः । अन्यच्च सौत्रामण्याम् **''ऐन्द्रमृषभम्''**

इत्यत्र गवालम्भकनिषेधवाक्येन गां परिहृत्य तत्स्थाने अज मालभन्ते । अत्र ऋषभस्थाने अजप्रतिनिधिकल्पने केन वा भवतामधिकारो दत्तः । परवालम्भनवादिनामत्र मौनमेव शरणम् । यदि कलियु गे ''अजम् अजाम्, अविं, मेषीं नालभेत'' इति निषेधवाक्यं श्रौतं स्मार्तं वा प्रमाणं यावन्नोपलभामहे तावत्पर्यन्तम् अजादीनाम् आलम्भनं न त्यजामः, इति यद्युच्येत तदपि न युक्तम् । कलियुगे गवालम्भनिषेधवाक्येनैव अजाद्यालम्भननिषेधस्यापि निषेधविधिः सिध्यतीति दत्तोत्तरत्वात् । गोवधनिषेधेनैव अजस्य, अपि वा अजादेः वधनिषेधः प्राप्त एव । हविष्यनधिकारत्वान्नैव आलब्धव्याः । अतः **''शिष्टाभावे सामान्यात् प्रतिनिधिः''** इत्येवं प्रमाणमनुसृत्य गो समानाधिकरण स्थाजादेरपि निषेधे लभ्यमाने तदनन्तरसमानाधिकरण स्थम् आज्यमेव पशुत्वेन कल्पनीयं भवति । यासामोषधीनां खादनपरिणामे ''मांसाज्ये'' भवेतां तदेव तयोः मांसपयसोः सामा नाधिकरण्यम् । पशोः सांनाय्यधर्मकथनप्रसङ्गे भट्टरुकारैः सम्यक् प्रतिपादितोऽयं विषयः । अतः कलौ आज्यमेव मांसप्रतिनिधिः इति परिणमति । अन्यच्च पशुर्नालब्धव्य एवेत्यत्र शृण्वन्तु श्लोकम् इमम् -

''यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते । संन्यासं चाग्निहोत्रं च'' इति । किन्तु एतत् स्मृतिवाक्यं ये प्रत्यक्षपशुवादिनः प्रमाणीकृत्य वर्णविभागस्थितिपर्यन्तं पश्वालम्भं कुर्म इति उद्धृतभुजाः उद्घुष्यन्ति किल, तेषां पुरतः अयं प्रश्नः उपक्षिप्यते । शालिवाहनशके १८२० सर्वधारिनामसंवत्सरे भारतदेशः स्वतन्त्रः सञ्जातः । तदारभ्य वर्णाश्रमशून्यमेव शासनं प्रवर्तते । अस्मिन् देशे अधुना शासकानां पुरतः स्ववर्णं कीर्तयितुमपि वयं न प्रभवामः । ईदृशे कालेऽपि वर्णविभागः अस्तीति स्वगृहे एव भवतां निर्णयः कूपस्थमण्डूकदशां स्मारयति । CONSTITUTION अस्मदीयानां धर्माणां विरुद्धं जागर्ति । अस्मद्बन्धुजनानां वेषभाषादिकम् आहारविहारौ च अविगणय्य अद्यापि वर्णविभागोऽस्तीति संभावनं न शास्त्रसम्मतम्

यतः वर्णाश्रमरक्षण तत्परान् क्षत्रियान् राज्यात् भ्रंशयित्वा, तेभ्यः राज्यमपहृत्य निःक्षत्रियत्वमापादिता ननु भारतभूः । वर्णाश्रमपरिपालकक्षत्रियाभावात् वर्णाश्रमौ अत्यन्तं विनष्टौ । वर्णाश्रमधर्मव्यतिरेकिण एव खलु अद्यतनाः परिपालका अस्मदीया अपि वर्णाश्रमधर्मान् उल्लङ्घ्यैव प्रवर्तन्ते इत्येतत्प्रत्यक्षमेव । अस्यामवस्थायामपि वर्णादिविभागोऽस्तीति संभावनम् आत्मवञ्चनमेव भवति । वर्णाश्रमविरोधिनि राज्ये निवसद्भिः गुप्ततया वर्णाश्रमपरिपालनमपि राजद्रोह एव भवेत् । तेन च एन एव शिष्यते । अतः अद्यापि वर्णविभागोऽस्तीति मन्वानैः क्रियमाणम् अजालम्भनं न धर्मावहमिति पर्यवसितम् । अस्यामवस्थायां धर्मा भासपिशाचाविष्टाः कांश्चित् राजभटान् उत्कोचादिसाधनेन स्वायत्तीकृत्य विनिश्चितगुप्तदेशे पश्वालम्भनं कुर्वन्तः यजमानाः, कुसुमेषु ताडितानां वृद्धानां दिवा भयं लज्जां च परित्यज्य रूपाजीवाप्रासादप्रवेशकानाम् उपमानतामेव भजन्त इति मन्यामहे । ते कुसुमेषु ताडिताः, एते पुनः धर्माभासपीडिता इत्येतावानेव अनयोर्भेदः ।

किं च केचन ब्राह्मणा आङ्ग्लविद्यां वैदिकविद्यां च अभ्यस्य राजकार्यालयेषु सेवां कुर्वन्तः प्रतिमासं वेतनं च स्वीकुर्वन्तः उदरपोषणं कुर्वन्ति । एवं प्रतिमासं वेतनस्वीकरणेन उद्योगकरणं ब्राह्मणत्वं नाशयति । अथापि एते एव श्रोत्रियंमन्याः वैतानिकेषु कर्मसु प्रविश्य स्वपाण्डित्यं प्रकटयन्तः, आर्त्विज्यं कृत्वा दक्षिणां संपाद्य सुखं जीवन्ति । यदि एते धार्मिकाः तर्हि रूपाजीवाभिः किम् अपराद्धम् । वर्णाश्रमविरुद्धेषु कार्यालयेषु वर्णाश्रमविरुद्धं कार्यं कुर्वतां गृहमागत्य वैदिकवेषधारणमा त्रेण नैव धार्मिकत्वसिद्धिः । एतेषां वर्णाश्रमधर्मविनाशकत्वेन राजद्रोहाचरणेन च द्विविधमप्येनः संपादितं भवति । अत एव लोके जीवनम् असिधाराव्रतमिति श्रुतिः बोधयति- **''यथाऽसिधारां कर्तेऽवहितामवक्रामेत्''** इत्यादिना । गुप्ततया पापाचरणे निरयप्राप्तिः । प्रकटतया पापाचरणे राजदण्ड इति असिधाराव्रतफलम् । ईदृशाः अपि वैतानिकेषु निर्भयम्

अजालम्भं कुर्वन्तीति जितं कलिना । एतादृशान् ब्राह्मणान् विलोक्य, **'एते द्विजाः सर्वे गोमांसभक्षकाः'** इति तान् निन्दन्तः आधुनिकाः वेदराशिमपि दूषयन्ति । अन्ते पश्वाम्लभकैः वेददूषणमेव कारितं भवति । अतः अत्यन्तं वर्णाश्रमविरुद्धेऽस्मिन् राज्ये काले च लोकविद्विष्टमजालम्भनं नैव कर्तव्यम् । **''लोकविद्विष्टं न कर्तव्यम्''(म.स्मृ- अ.२, श्लो. ५७)** इति भार्गवे मनुधर्मशास्त्रे उद्घोषितं पश्यत । इतोऽप्यधिकं श्रुतिर्वा स्मृतिर्वा नान्वेषणीया । **''शिष्टाभावे सामान्यात् प्रतिनिधिः''** इति न्यायमनुसृत्य कालानुरोधेन प्रतिनिधिकल्पनमेव युक्तं भवति । यतः बहवः शास्त्रज्ञाः प्रख्याताः सनातनधर्मैकनिरताश्च पण्डिता अपि धर्मशा स्त्रविरुद्धं वेतनं प्रतिमासं स्वीकृत्यैव जीवन्ति । कालमनुसृत्यैव खलु तैः एवं क्रियते । एतादृशेषु अनितरसाधारण प्रज्ञानवन्तः केचन वैदिकशिरोमणयः कार्यालयात् गृहमागत्य स्नानं कृत्वा **''अग्निहोत्र''** कुर्वन्ति । कथमेतेषां तत्राधिकारः ? प्रातरारभ्य यावदस्तम् असञ्चरणीये वर्णसाङ्कर्यभूयिष्ठप्रदेशे उदरनिमित्तां सेवां कृत्वा स्नानमात्रेण कथमे तेषाम् अग्निहोत्रानुष्ठानेऽधिकारः । येषां समयाविषितकालसम्पाद्यमा नच्छायामात्रदूरे स्थातव्यं, तेषां द्विप्रादेशमात्रदूरे यामत्रयवर्तिनां कथं वैतानिकानुष्ठाने अधिकारः । दैवात् एकस्मिन् दिवसे काकतालीयेन तत्समीपगमने क्वचित् पावमानादिसूक्तस्नानेन शुचित्वं संभवेत् । अत्र तथा न भाव्यते । यतः बुद्धिपूर्वकं प्रतिदिनं नियमेन कार्यालयं गत्वा सायं पवित्रतां ते कथमुपलभेरन् ? एतद्विस्मृत्य वयं सनातनधर्मं पालयामः अस्मदधीन एव सनातनधर्मोऽस्तीति साहङ्कारं हृदि विन्यस्तहस्ताः ते मोमुह्यन्ते, स्वीयम् अनाचारम् अविगणय्य । एवं दुरवलेपवतां दर्शं दर्शं केषाञ्चन उरस्ताडनमहोत्सवः एव स्मृतिपथमेति । अहो ! वर्णाश्रमशून्यदेशे अनुष्ठीयमानो यज्ञः शास्त्रविरुद्धो राजविरुद्धश्च भवेत् । शासने वर्णाश्रमविध्यभावात् अस्माभिः ध्रियमाणो धर्मः न मुख्यतामियात् । अतः तादृशे देशे गौण एव यज्ञादिः कार्यः । न तु

परवालम्बनं शास्त्रविरुद्धं कलौ अनुष्ठेयं भवति । ‘‘शिष्टाभावे’’ इत्यत्र न स्वेच्छाकल्पितोऽर्थः । एवं विग्रहः कर्तव्यः । अनुपलम्भेन वा कालावच्छेदेन निषिद्धत्वेन वा शिष्टस्य विहितस्य अभावे इत्येव अर्थो ग्राह्यः । अभावत्वं निषिद्धपर्यायत्वेनेति भाव्यम्

कलौ सर्वत्र वैदिकतन्त्रे मांसं निषिद्धं भवति । पश्यत । ब्राह्मणानां नित्यभोजने पितुः प्रत्याब्दिकश्राद्धे मधुपर्के अष्टकाश्राद्धे बोधायनमतात् काम्यपशूनां गृह्यानुष्ठाने इत्येवं श्रुतिचोदितेषु स्थलेषु मांसनिषेधः कृतः । श्रौताभिमानिभिरपि एषु कर्मसु मांसं परित्याज्यमेवेति पर्यवस्यति । केचन बालाः- **‘‘अश्वालम्भं गवालम्भम्’’** इति स्मृतिवाक्यम्, **‘‘अग्नीषोमीयं पशुमालभेत’’** इत्यादिकं तु श्रुतिवाक्यम्, स्मृत्यपेक्षया हि श्रुतिर्बलीयसी । अतः अजालम्भं कुर्मः इति वदन्ति । तन्न चारु । श्रौतात् कर्मणः गृह्यस्यैव मुख्यत्वं दृश्यते । यतः उपनयनादिकं गृह्योक्तं कर्म । उपनीतस्यैव वेदे अधिकारः । दारयुक्तस्यैव श्रौतकर्मण्यधिकारः। स च दारग्रहणविधिः गृह्य एव दृश्यते । न कुत्रापि श्रौतो विवाहो दृश्यते । अतः पितुः जायमानपुत्रवत् गृह्यात् श्रौतकर्मप्राप्तिः । पितृसदृशे गृह्ये एव मांसनिषेधे प्राप्ते कथं पुत्रभूते श्रौते मांसप्रकृतिकं कर्म भवेत् ? पश्यत- ‘‘आषोडशाद् ब्राह्मणस्य’’ इत्यादिना अनुपनीतदोषः श्रूयते । तत ऊर्ध्वं प्रायश्चित्तपूर्वकमेव उपनयनं कर्तव्यं भवति । अतः उपनयनाभावे अस्यैव दोषः अस्मिन्नेव जन्मनि । वेदश्रौताभावे तृतीयस्य पुरुषस्यैव दौर्ब्राह्मण्यावाप्तिः । अतः कस्य मुख्यत्वं शास्त्रेषु कथितमिति आलोचनीयम् । अतः स्मार्तेषु कर्मसु यो मांसनिषेधः प्रवृत्तः सः स्वयमेव पितुर्गुणः पुत्रे प्रविशमान इव श्रौते कर्मणि अपि कलौ प्रविष्ट एव इति आलोचनीयम् आयुष्मद्भिः। अतः गृह्ये निषिद्धं मांसजातं श्रौतेऽपि निषिद्धमेवेति मन्तव्यम् । विशेषविधिं विना कथं प्रसज्येत पश्वालम्भः । ‘‘अग्नीषोमीयं पशुमालभेत’’ इति इदं वाक्यं नैव विशेषविधिः । अन्ये तु बालाः अग्नीषोमीयसवनीयादिषु पश्वनालम्भे यज्ञो विनष्ट इति मन्यमाना न

केवलं मानसं, वाचिकमपि महान्तं ध्वानं कुर्वन्ति ‘‘विनष्टो यज्ञो यज्ञो विनष्टः’’ इति । ऊर्ध्वबाहवः स्वकलत्रवियोगकाले रुदन्त इव भूतग्रस्ता इव च शब्दं कुर्वन्ति । अहो ! एवं न कुत्रापि प्रमाणम् उपलभ्यते अग्नीषोमीयपश्वनालम्भे नष्टो यज्ञः इति । तेषां मतौ सर्वोऽपि यज्ञः अजजातौ प्रविष्टः इति ज्ञायते । अजमांसाभावे यज्ञ एव नास्तीति ते प्रजाः वञ्चयन्ति । प्रधानभूतस्य सोमस्यापि प्रतिनिधिं कृत्वा यजतामेतेषाम् अनादिसिद्धमिदमज्ञानं यद् अजालम्भनस्य प्रतिनिध्यभाव इति । अतः उन्मत्ता इव ‘‘अग्नीषोमीयं पशुमालभेत’’ इत्येव वारं वारम् आम्रेडनं कुर्वन्ति । नान्यद्वाक्यं विजानन्ति । **‘‘सोमाभावे पूतीकानभिषुणुयात्’’** इतीदं वाक्यं न कुत्रापि उपलभ्यते । प्रायश्चित्तप्रकरणे लिखितम् । अत्र **‘‘अलाभे’’ ‘‘अभावे’’** शब्दयोर्भेद एव न गृहीतः एतैः । अभाव इत्येव गृहीते प्रायश्चित्तप्रकरणस्थमेव इदं वाक्यमिति अहं निर्णयं करोमि । यदि विधिवाक्योल्लङ्घनमेव दोष इत्युच्यते, तर्हि विधिवाक्योल्लङ्घनम् अजालम्भनासक्तैरेव बहुत्र क्रियते । तदपि निदर्शयामि । कृपया अव्यग्रचित्तैः द्रष्टव्यम् । अग्न्याधेये अश्वपदाभावः, अजबन्धनाभावः । पशौ स्वधितेः द्विधाराभावः, तत्रैव संमृष्टस्वधितिं विना बहूनां स्वधितीनां यथावकाशं स्वीकारः । ‘‘एकधास्य त्वचमाच्छ्यतात्’’ इति स्थिते बहुधा त्वचः निकृन्तनम् । वङ्क्रीणाम् अनुद्धरणम् । हृदयशूले हृदयलगनाकरणं, तस्य कुम्भ्यामेव श्रपणं, पश्वैकनिष्ठप्राणैः पशुकरणेप्सुभिः पश्विडाभक्षणे जुगुप्सा (इदं साक्षात् सशरीरनिरयप्रापकं पापम्), हविःशेषभक्षणाभावः । सोमे प्राग्वंशस्य चतुर्द्वाराभावः, दीक्षानियमसङ्कोचः । व्रतपाने उपसत्सु स्तननियमाभावः । स्तोत्रेषु उपगानाभावः । वस्तुतः उपगानशब्दार्थ ज्ञानाभावः । दक्षिणायाः प्रतिरूपकं व्यावहारिकद्रव्यमात्रदानम् । अत्र केनापि पुण्यात्मना पापात्मना वा दक्षिणायाः पतिनिधिकल्पने अनुज्ञा न दत्ता । हौत्रादीनां मन्द्रादिस्थानत्रयज्ञानाभावः । तत्रैव प्रतिस्थानं सप्तयमा इत्यस्य अनुभवाभावः । अग्नौ उभयपार्श्वे

अश्वस्थापनाभावः । पुरीषेण प्रस्ताराकरणम् । साहस्रहिरण्य शकलप्रोक्षणे स्वैरता । सर्वेषां परं कुठारस्वरूपं, सोमस्थाने पूतीकाग्रहणम् इति दिङ्मात्रेण निर्दिष्टाः विध्युल्लङ्घनदोषाः । इत्येवं विधिवाक्योल्लङ्घनम् अजभ्रमग्रस्तैः बहुधा क्रियते । कथमेतत् इति पृष्टे, एवमेव संप्रदाय इति धाष्टर्यं प्रदर्शयन्ति । अज्ञानतः अशक्तितः अन्यतश्च यतःकुतश्चित् प्रवृत्तस्य दोषजातस्य संवरणं सम्प्रदायशब्देन क्रियते । अस्मिन् सन्दर्भे **''येनास्य पितरो याताः'' (मनु.स्मृ-४.१७८)** इत्येतन्मनुवाक्यं दुरुपयुज्यते । वस्तुत यज्ञसिद्धिः मन्त्रैः दक्षिणयैव भवति । न केवलम् अजालम्भनमात्रेण अजालम्भनं मन्त्रवत्येव कर्मणि दोषाभावं संपादयेत् । उपगानादि-शून्ये यज्ञे क्रियमाणमजालम्भनं निरयप्रापकमेव भवेत् । अतः अस्मिन् कलौ वर्णाश्रमविरुद्धे अस्मिन् राज्ये तैस्तैः क्रियमाणमजालम्भनं न केवलं राजद्रोहरूपं नापि केवलं लोकविद्विष्टम्, किंतु निरयावहमपीति ऊर्ध्वबाहुः अहं विरौमि । अतः याज्ञिकैस्सर्वैः अजस्थाने आज्यमेव ग्राह्यं वैतानिकेषु कर्मस्विति सर्वं सुस्थम् ।

।। इति श्री श्री श्री शृङ्गगिरिपीठाधीश्वराणां सिद्धिंगता नामभिनवविद्यातीर्थमहास्वामिनां तथा महाराष्ट्रान्तर्गत सोलापूरमण्डलस्थ प्रज्ञापुरापरनामक-अक्कलकोटस्थानां परमसद्गुरु श्री श्री श्री गजानन महाराजानां च पादसेवी अरिभित्तुरसीतारामयज्वनां पुत्रेषु अन्यतमो विलक्षणश्च अ. सी. विश्वनाथश्रौती ।

***

इयं मातृका विदुषा प्रा. श्रीनिधिवासिष्ठमहाभागेन दत्ता

